P.G.Diploma in Yoga Vijnan
Paper - V

# VARNAMALA, SHABDAMANJARI & DHATHUMANJARI.

# BHAGAVADGEETHA (CHAPTER 12), RAGHUVAMSAM, & KATHOPANISHAD


**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha
Accredited at ‘A’ level by NAAC
Tirupati - 517 064 (A.P.)

# VARNAMALA

## स्वरवर्णाः

| | | | | | | |
|---|---|---|---|---|---|---|
| अ | आ | इ | ई | उ | ऊ | ऋ |
| a | ā | i | ī | u | ū | ṛ |
| ऌ | ए | ऐ | ओ | औ | अं | अः |
| lṛ | ē | ai | ō | au | aṃ | aḥ |

## व्यञ्जनवर्णाः

| | | | | | |
|---|---|---|---|---|---|
| क | ख | ग | घ | ङ | (क वर्गः) |
| ka | kha | ga | gha | ṅa | |
| च | छ | ज | झ | ञ | (च वर्गः) |
| Ca | Cha | Ja | Jha | Ña | |
| ट | ठ | ड | ढ | ण | (ट वर्गः) |
| Ṭa | Ṭha | Ḍa | Ḍha | Ṇa | |
| त | थ | द | ध | न | (त वर्गः) |
| Ta | Tha | Da | Dha | Na | |
| प | फ | ब | भ | म | (प वर्गः) |
| Pa | Pha | Ba | Bha | Ma | |
| य | र | ल | व | | |
| Ya | Ra | La | Va | | |
| श | ष | स | ह | | |
| Śa | Ṣa | Sa | Ha | | |
| क्ष | त्र | ज्ञ | | | |
| kṣa | tra | jña | | | |

# SHABDAMANJARI

# UNIT- I : अजन्त-साधारणशब्दाः

## 1. अकारान्तः पुंलिङ्गः 'राम' शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| सम्बोधनप्रथमा | हे राम | हे रामौ | हे रामाः |
| द्वितीया | रामं | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः |
| पञ्चमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु |

**एवं** कृष्णः, गोविन्दः, मुकुन्दः, शिवः, निलयः, वृक्षः, **इत्यादयः**

## 2. इकारान्तः पुंलिङ्गः 'हरि' शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| सम्बोधनप्रथमा | हे हरे | हे हरी | हे हरयः |
| द्वितीया | हरिं | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पंचमी | हरोः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु |

**एवं** कविः, अग्निः, रविः, दाशरथिः, **इत्यादयः** ।

## 3. उकारान्तः पुंलिङ्गः 'गुरु' शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | गुरुः | गुरू | गुरवः |
| सम्बोधनप्रथमा | हे गुरो | हे गुरू | हेगुरवः |
| द्वितीया | गुरुम् | गुरू | गुरून् |
| तृतीया | गुरुणा | गुरुभ्यां | गुरुभ्यः |
| चतुर्थी | गुरवे | गुरुभ्यां | गुरुभ्यः |
| पञ्चमी | गुरोः | गुरुभ्यां | गुरुभ्यः |
| षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी | गुरौ | गुर्वोः | गुरुषु |

**एवं,** विष्णुः, गुरुः, भानुः, विधुः, **इत्यादयः।**

## 4. ऋकारान्तः पुंलिङ्गः 'पितृ' शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| सम्बोधनप्रथमा | हे पितः | हे पितरौ | हे पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |

**एवं,** जामाता, भ्राता, **इत्यादयः।**

## 5. ओकारान्तः पुंलिङ्गः 'गो' शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | गौः | गावौ | गावः |
| सम्बोधनप्रथमा | हे गौः | हे गावौ | हे गावः |
| द्वितीया | गां | गावौ | गाः |
| तृतीया | गवा | गोभ्याम् | गोभिः |
| चतुर्थी | गवे | गोभ्याम् | गोभ्यः |
| पञ्चमी | गोः | गोभ्याम् | गोभ्यः |
| षष्ठी | गोः | गवोः | गवाम् |
| सप्तमी | गवि | गावोः | गोषु |

**एवं,** सुद्यौः स्मृतौः **इत्यादयः**

# स्त्रीलिङ्ग-साधारणशब्दाः।

## 6. आकारान्तः स्त्रीलिङ्गः 'लता' शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | लता | लते | लताः |
| सम्बोधनप्रथमा | हे लते | हे लते | हे लताः |
| द्वितीया | लताम् | लते | लताः |
| तृतीया | लताया | लताभ्याम् | लताभिः |
| चतुर्थी | लतायै | लताभ्याम् | लताभ्यः |
| पञ्चमी | लतायाः | लताभ्याम् | लताभ्यः |
| षष्ठी | लतायाः | लतायोः | लताणाम् |
| सप्तमी | लतायाम् | लतायोः | लतासु |

**एवं,** रमा, सीता, भामा, **इत्यादयः।**

## 7. इकारान्तः स्त्रीलिङ्गः 'मति' शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| सम्बोधनप्रथमा | हे मते | हे मती | हे मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै,मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः,मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः,मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्, मतौ | मत्योः | मतिषु |

**एवं** रुचिः, घृणिः, गतिः, **इत्यादयः**

## 8. उकारान्तः स्त्रीलिङ्गः 'धेनु' शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | धेनुः | धेनू | धेनवः |
| सम्बोधनप्रथमा | हे धेनो | हे धेनू | हे धेनवः |
| द्वितीया | धेनुं | धेनू | धेनूः |
| तृतीया | धेन्वा | धेनुभ्याम् | धेनुभिः |
| चतुर्थी | धेन्वै,धेनवे | धेनुभ्याम् | धेनुभ्यः |
| पञ्चमी | धेन्वाः,धेनोः | धेनुभ्याम् | धेनुभ्यः |
| षष्ठी | धेन्वाः,धेनोः | धेन्वोः | धेनूनाम् |
| सप्तमी | धेन्वाम्, धेनौ | धेन्वोः | धेनुषु |

**एवं** तनुः, इषुः, पटुः, **इत्यादयः**

## 9. अकारान्तः नपुंसकलिङ्गः 'फल' शब्दः।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | फलं | फले | फलाणि |
| सम्बोधनप्रथमा | हे फल | हे फाले | हे फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्याम् | फलैः |
| चतर्थी | फलाय | फलाभ्याम् | फलेभ्यः |
| पञ्चमी | फलात् | फलाभ्याम् | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु |

**एवं**, ज्ञानं, वनं, धनं, **इत्यादयः ।**

## 10. इकारान्तः नपुंसकलिङ्गः 'वारि' शब्दः।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | वारि | वारिणी | वारीणि |
| सम्बोधनप्रथमा | हे वारे,हे वारि | हे वारिणी | हे वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्याम् | वारिभिः |
| चतर्थी | वारिणे | वारिभ्याम् | वारिभ्यः |
| पञ्चमी | वारिणः | वारिभ्याम् | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु |

**एवं**, कराघ्रि, पादपाणि, हरहरि, **इत्यादयः ।**

## 11. तकारान्तः पुंलिङ्गः 'मरुत्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | मरुतौ | मरुतौ | मरुतः |
| सम्बोधनप्रथमा | हे मरुत् | हे मरुतौ | हे मरुतः |
| द्वितीया | मरुतम् | मरुतौ | मरुतः |
| तृतीया | मरुता | मरुदभ्याम् | मरुदभिः |
| चतुर्थी | मरुते | मरुद्भ्याम् | मरुद्भ्यः |
| पञ्चमी | मरुतः | मरुद्भ्याम् | मरुद्भ्यः |
| षष्ठी | मरुतः | मरुतोः | मरुताम् |
| सप्तमी | मरुति | मरुतोः | मरुत्सु |

**एवं**, इन्द्रजित्, भाष्यकृत् **इत्यादयः**

## 4. सकारान्तः पुंलिङ्गः विद्वच्छब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | विद्वान् | विद्वांसौ | विद्वांसः |
| सम्बोधनप्रथमा | हे विद्वन् | हे विद्वांसौ | हे विद्वांसः |
| द्वितीया | विद्वांसम् | विद्वांसौ | विदुषुः |
| तृतीया | विदुषा | विद्वदभ्याम् | विद्वदभिः |
| चतुर्थी | विदुषे | विद्वदभ्याम् | विद्वदभिः |
| पञ्चमी | विदुषः | विद्वदभ्याम् | विदुषाम् |
| षष्ठी | विदुषः | विदुषोः | विदुषाम् |
| सप्तमी | विदुषि | विदुषोः | विद्वत्सु |

**एवं**, सेदिवान्, उपेयिवान् **इत्यादयः**

## 12. नकारान्तः पुंलिङ्गः 'राजन्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | राजा | राजानौ | राजानः |
| सम्बोधनप्रथमा | हे राजन् | हे राजानौ | हे राजानः |
| द्वितीया | राजानम् | राजानौ | राज्ञः |
| तृतीया | राज्ञा | राजभ्याम् | राजभिः |
| चतुर्थी | राज्ञे | राजभ्याम् | राजभ्यः |
| पञ्चमी | राज्ञः | राजभ्याम् | राजभ्यः |
| षष्ठी | राज्ञः | राज्ञोः | राज्ञाम् |
| सप्तमी | राज्ञि, राजनि | राज्ञोः | राजसु |

**एवं, वृषा, महिमा, इत्यादयः**

## 13. सकारान्तः नपुंलिङ्गः 'मनस्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | मनः | मनसी | मनांसि |
| सम्बोधनप्रथमा | हे मनः | हे मनसी | हे मनांस |
| द्वितीया | मनः | मनसी | मनांसि |
| तृतीया | मनसा | मनोभ्याम् | मनोभिः |
| चतुर्थी | मनसे | मनोभ्यम् | मनोभ्यः |
| पञ्चमी | मनसः | मनोभ्याम् | मनोभ्यः |
| षष्ठी | मनसः | मनसोः | मनसाम् |
| सप्तमी | मनसि | मनसोः | मनस्तु |

**एवं**, वयः, पयः, **इत्यादयः।।**

# UNIT- II : सर्वनामशब्दाः

**1.** दकारान्तः त्रिषु लिङ्गेषु सरूपः '**अस्मद्**' शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्, मा | आवाम्, नौ | अस्मान्, नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्, मे | आवाभ्याम्, नौ | अस्मभ्यम्, नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम, मे | आवयोः, नौ | अस्माकम्, नः |
| सप्तमी | मयि | आवयोः | आस्मासु |

**2.** दकारान्तः त्रिषु लिङ्गेषु सरूपः '**युष्मद्**' शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | त्वं | युवाम् | यूयम् |
| द्वितीया | त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम्, ते | युवाभ्याम्, वाम् | युष्मभ्यम्, वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव, ते | युवयोः, वाम् | युष्माकम्, वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

**3.** दकारान्तः पुंलिंगः '**तद्**' शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | सः | तौ | तान् |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

## 4. दकारान्तः स्त्रीलिंगः 'तद्' शब्दः ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

## 5. दकारान्तः नपुंसकलिंगः 'तद्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

## 6. दकारान्तः पुंलिंगो 'यद्' यच्छब्दः।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | यः | यौ | ये |
| द्वितीया | यम् | यौ | यान् |
| तृतीया | येन | याभ्याम् | यैः |
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येषाम् |
| सप्तमी | यस्मिन् | ययोः | येषु |

## 7. दकारान्तः स्त्रीलिंगो 'यद्' शब्दः।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | या | ये | याः |
| द्वितीया | याम् | ये | याः |
| तृतीया | यया | याभ्याम् | याभिः |
| चतुर्थी | यस्यै | याभ्याम् | याभ्यः |
| पञ्चमी | यस्याः | याभ्याम् | याभ्यः |
| षष्ठी | यस्याः | ययोः | यासाम् |
| सप्तमी | यस्याम् | ययोः | यासु |

**8. दकारान्दः नपुंसकलिङ्गः 'यद्' शब्दः।**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | यत् | ये | यानि |
| द्वितीया | यत् | ये | यानि |
| तृतीया | येन | याभ्याम् | यैः |
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येषाम् |
| सप्तमी | यस्मिन् | ययोः | येषु |

**9.** मकारान्तः पुंलिंगः **'किम्'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

**10.** मकारान्तः स्त्रीलिङ्गः **किम्** शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

**11.** मकारान्तः नपुंसकलिङ्गः **किम्** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

# DHATHUMANJARI

# धातुरूपाणि

**1. भू** =सत्तायाम्

(१) वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | भवति | भवतः | भवन्ति |
| मध्यमपुरुषः | भवसि | भवथः | भवथ |
| उत्तमपुरुषः | भवामि | भवावः | भवामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST- TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अभवत् | अभवताम् | अभवन् |
| मध्यमपुरुषः | अभवः | अभवतम् | अभवत |
| उत्तमपुरुषः | अभवम् | अभवाव | अभवाम |

**2. खाद - भक्षणे**

(१) वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | खादति | खादतः | खादन्ति |
| मध्यमपुरुषः | खादसि | खादथः | खादथ |
| उत्तमपुरुषः | खादमि | खादवः खादमः | |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | खादिष्यति | खादिष्यतः | खादिष्यन्ति |
| मध्यमपुरुषः | खादिष्यसि | खादिष्यथः | खादिष्यथ |
| उत्तमपुरुषः | खादिष्यामि | खादिष्यावः | खादिष्यामः |

(३) लङ् (अनद्यतन - भूते= DISTANT PAST- TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अखादत् | अखादताम् | अखादन् |
| मध्यमपुरुषः | अखादः | अखादतम् | अखादत |
| उत्तमपुरुषः | अखादम् | अखादाव | अखादाम |

**4. वद - व्यक्तायां वाचि**

(१)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | वदति | वदतः | वदन्ति |
| मध्यमपुरुषः | वदसि | वदथः | वदथ |
| उत्तमपुरुषः | वदामि | वदावः | वदामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | वदिष्यति | वदिष्यतः | वदिष्यन्ति |
| मध्यमपुरुषः | वदिष्यसि | वदिष्यथः | वदिष्यथ |
| उत्तमपुरुषः | वदिष्यामि | वदिष्यावः | वदिष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अवदत् | अवदताम् | अवदन् |
| मध्यमपुरुषः | अवदः | अवदतम् | अवदत |
| उत्तमपुरुषः | अवदम् | अवदाव | अवदाम |

**5. पठ - व्यक्तायां वाचि**

(१)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST- TENSE))

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

## 6. इष - इच्छायाम्

(१)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | इच्छति | इच्छतः | इच्छन्ति |
| मध्यमपुरुषः | इच्छसि | इच्छथः | इच्छथ |
| उत्तमपुरुषः | इच्छामि | इच्छावः | इच्छामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | एषिष्यति | एषिष्यतः | एषिष्यन्ति |
| मध्यमपुरुषः | एषिष्यसि | एषिष्यथः | एषिष्यथ |
| उत्तमपुरुषः | एषिष्यामि | एषिष्यावः | एषिष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | ऐच्छत् | ऐच्छताम् | ऐच्छन् |
| मध्यमपुरुषः | ऐच्छः | ऐच्छतम् | ऐच्छत |
| उत्तमपुरुषः | ऐच्छम् | ऐच्छाव | ऐच्छाम |

## 7. क्षि - क्षये

(१)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | क्षयति | क्षयतः | क्षयन्ति |
| मध्यमपुरुषः | क्षयसि | क्षयथः | क्षयथ |
| उत्तमपुरुषः | क्षयामि | क्षयावः | क्षयामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | क्षेष्यति | क्षेष्यतः | क्षेष्यन्ति |
| मध्यमपुरुषः | क्षेष्यसि | क्षेष्यथः | क्षेष्यथ |
| उत्तमपुरुषः | क्षेष्यामि | क्षेष्यावः | क्षेष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अक्षयत् | अक्षयताम् | अक्षयन् |
| मध्यमपुरुषः | अक्षयः | अक्षयतम् | अक्षयत |
| उत्तमपुरुषः | अक्षयम् | अक्षयाव | अक्षयाम |

**8. प्रच्छ - ज्ञीप्सायाम्**

(१)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पृच्छति | पृच्छतः | पृच्छन्ति |
| मध्यमपुरुषः | पृच्छसि | पृच्छथः | पृच्छथ |
| उत्तमपुरुषः | पृच्छामि | पृच्छावः | पृच्छामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | प्रक्ष्यति | प्रक्ष्यतः | प्रक्ष्यन्ति |
| मध्यमपुरुषः | प्रक्ष्यसि | प्रक्ष्यथः | प्रक्ष्यथ |
| उत्तमपुरुषः | प्रक्ष्यामि | प्रक्ष्यावः | प्रक्ष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अपृच्छत् | अपृच्छताम् | अपृच्छन् |
| मध्यमपुरुषः | अपृच्छः | अपृच्छतम् | अपृच्छत |
| उत्तमपुरुषः | अपृच्छम् | अपृच्छाव | अपृच्छाम |

**9. कथ-वाक्य प्रबन्धे**

(१)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | कथयति | कथयतः | कथयन्ति |
| मध्यमपुरुषः | कथयसि | कथयथः | कथयथ |
| उत्तमपुरुषः | कथयामि | कथयावः | कथयामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | कथयिष्यति | कथयिष्यतः | कथयिष्यन्ति |
| मध्यमपुरुषः | कथयिष्यसि | कथयिष्यथः | कथयिष्यथ |
| उत्तमपुरुषः | कथयिष्यामि | कथयिष्यावः | कथयिष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अकथयत् | अकथयताम् | अकथयन् |
| मध्यमपुरुषः | अकथयतं | अकथयतम् | अकथयत |
| उत्तमपुरुषः | अकथयम् | अकथयाव | अकथयाम |

**10. जि =जये**

(१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जयति | जयतः | जयन्ति |
| मध्यमपुरुषः | जयसि | जयथः | जयथ |
| उत्तमपुरुषः | जयामि | जयावः | जयामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जेष्यति | जेष्यतः | जेष्यन्ति |
| मध्यमपुरुषः | जेष्यसि | जेष्यथः | जेष्यथ |
| उत्तमपुरुषः | जेष्यामि | जेष्यावः | जेष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE))

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अजयत् | अजयताम् | अजयन् |
| मध्यमपुरुषः | अजयः | अजयतम् | अजयत |
| उत्तमपुरुषः | अजयम् | अजयाव | अजयाम |

**11. दृशिर् - प्रेक्षणे,**

(१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पश्यति | पश्यतः | पश्यन्ति |
| मध्यमपुरुषः | पश्यसि | पश्यथः | पश्यथ |
| उत्तमपुरुषः | पश्यामि | पश्यावः | पश्यामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति |
| मध्यमपुरुषः | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| उत्तमपुरुषः | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE))

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपश्यत् | अपश्यताम् | अपश्यन् |
| मध्यमपुरुषः | अपश्यः | अपश्यतम् | अपश्यत |
| उत्तमपुरुषः | अपश्यम् | अपश्याव | अपश्याम |

## 12. गम्लृ - गतौ, (गच्छ)

(१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छति | गच्छतः | गच्छन्ति |
| मध्यमपुरुषः | गच्छसि | गच्छथः | गच्छथ |
| उत्तमपुरुषः | गच्छामि | गच्छावः | गच्छामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमपुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST- TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यमपुरुषः | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तमपुरुषः | अगच्छम् | अगच्छावः | अगच्छामः |

## 13. पा - पाने, (पिब)

(१)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पिबति | पिबतः | पिबन्ति |
| मध्यमपुरुषः | पिबसि | पिबथः | पिबथ |
| उत्तमपुरुषः | पिबामि | पिबावः | पिबामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पास्यति | पास्यतः | पास्यन्ति |
| मध्यमपुरुषः | पास्यसि | पास्यथः | पास्यथ |
| उत्तमपुरुषः | पास्यामि | पास्यावः | पास्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अपिबत् | अपिबताम् | अपिबन् |
| मध्यमपुरुषः | अपिबः | अपिबतम् | अपिबत |
| उत्तमपुरुषः | अपिबम् | अपिबाव | अपिबाम |

## 14. ष्ठा - गतिनिवृत्तौ,

(१)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | तिष्ठति | तिष्ठतः | तिष्ठन्ति |
| मध्यमपुरुषः | तिष्ठसि | तिष्ठथः | तिष्ठथ |
| उत्तमपुरुषः | तिष्ठामि | तिष्ठावः | तिष्ठामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | स्थास्यति | स्थास्यतः | स्थास्यन्ति |
| मध्यमपुरुषः | स्थास्यसि | स्थास्यथः | स्थास्यथ |
| उत्तमपुरुषः | स्थास्यामि | स्थास्यावः | स्थास्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अतिष्ठत् | अतिष्ठताम् | अतिष्ठन् |
| मध्यमपुरुषः | अतिष्ठः | अतिष्ठतम् | अतिष्ठत |
| उत्तमपुरुषः | अतिष्ठम् | अतिष्ठाव | अतिष्ठाम |

## 15. लिख- अक्षर विन्यासे

(१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लिखति | लिखतः | लिखन्ति |
| मध्यमपुरुषः | लिखसि | लिखथः | लिखथ |
| उत्तमपुरुषः | लिखामि | लिखावः | लिखामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लेखिष्यति | लेखिष्यतः | लेखिष्यन्ति |
| मध्यमपुरुषः | लेखिष्यसि | लेखिष्यथः | लेखिष्यथ |
| उत्तमपुरुषः | लेखिष्यामि | लेखिष्यावः | लेखिष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अलिखत् | अलिखताम् | अलिखन् |
| मध्यमपुरुषः | अलिखः | अलिखतम् | अलिखत |
| उत्तमपुरुषः | अलिखम् | अलिखाव | अलिखाम |

## 16. नृती - गात्रविक्षेपे

(१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नृत्यति | नृत्यतः | नृत्यन्ति |
| मध्यमपुरुषः | नृत्यसि | नृत्यथः | नृत्यथ |
| उत्तमपुरुषः | नृत्यामि | नृत्यावः | नृत्यामः |

2)A. भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नर्तिष्यति | नर्तिष्यतः | नर्तिष्यन्ति |
| मध्यमपुरुषः | नर्तिष्यसि | नर्तिष्यथः | नर्तिष्यथ |
| उत्तमपुरुषः | नर्तिष्यामि | नर्तिष्यावः | नर्तिष्यामः |

B. भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नर्त्स्यति | नर्त्स्यतः | नर्त्स्यन्ति |
| मध्यमपुरुषः | नर्त्स्यसि | नर्त्स्यथः | नर्त्स्यथ |
| उत्तमपुरुषः | नर्त्स्यामि | नर्त्स्यावः | नर्त्स्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अनृत्यत् | अनृत्यताम् | अनृत्यन् |
| मध्यमपुरुषः | अनृत्यः | अनृत्यतम् | अनृत्यत |
| उत्तमपुरुषः | अनृत्यम् | अनृत्याव | अनृत्याम |
| उत्तमपुरुषः | अनर्तिषम् | अनर्तिषाव | अनर्तिषाम |

## 17. णश - अदर्शने

(१) वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नश्यति | नश्यतः | नश्यन्ति |
| मध्यमपुरुषः | नश्यसि | नश्यथः | नश्यथ |
| उत्तमपुरुषः | नश्यामि | नश्यावः | नश्यामः |

(2) A. भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नशिष्यति | नशिष्यतः | नशिष्यन्ति |
| मध्यमपुरुषः | नशिष्यसि | नशिष्यथः | नशिष्यथ |
| उत्तमपुरुषः | नशिष्यामि | नशिष्यावः | नशिष्यामः |

(2) B. भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नङ्क्ष्यति | नङ्क्ष्यतः | नङ्क्ष्यन्ति |
| मध्यमपुरुषः | नङ्क्ष्यसि | नङ्क्ष्यथः | नङ्क्ष्यथ |
| उत्तमपुरुषः | नङ्क्ष्यमि | नङ्क्ष्यवः | नङ्क्ष्यमः |

(३) लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अनश्यत् | अनश्यताम् | अनश्यन् |
| मध्यमपुरुषः | अनश्यः | अनश्यतम् | अनश्यत |
| उत्तमपुरुषः | अनश्यम् | अनश्या | अनश्याम |

## 18. डु पचष् - पाके

(१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पचति | पचतः | पचन्ति |
| मध्यमपुरुषः | पचसि | पचथः | पचथ |
| उत्तमपुरुषः | पचामि | पचावः | पचामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पक्ष्यति | पक्ष्यतः | पक्ष्यन्ति |
| मध्यमपुरुषः | पक्ष्यसि | पक्ष्यथः | पक्ष्यथ |
| उत्तमपुरुषः | पक्ष्यामि | पक्ष्यावः | पक्ष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपचत् | अपचताम् | अपचन् |
| मध्यमपुरुषः | अपचः | अपचतम् | अपचत |
| उत्तमपुरुषः | अपचम् | अपचाव | अपचाम |

## 19. यज- देवपूजासंगतिकरणदानेषु उभयपदी

(१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | यजति | यजतः | यजन्ति |
| मध्यमपुरुषः | यजसि | यजथः | यजथ |
| उत्तमपुरुषः | यजामि | यजावः | यजामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | यक्ष्यति | यक्ष्यतः | यक्ष्यन्ति |
| मध्यमपुरुषः | यक्ष्यसि | यक्ष्यथः | यक्ष्यथ |
| उत्तमपुरुषः | यक्ष्यामि | यक्ष्यावः | यक्ष्यामः |

(३) लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अयजत् | अयजताम् | अयजन् |
| मध्यमपुरुषः | अयजः | अयजतम् | अयजत |
| उत्तमपुरुषः | अयजम् | अयजाव | अयजाम |

## 20. णीञ् - प्रापणे उभयपदी

(१)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | नयति | नयतः | नयन्ति |
| मध्यमपुरुषः | नयसि | नयथः | नयथ |
| उत्तमपुरुषः | नयामि | नयावः | नयामः |

२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | नेष्यति | नेष्यतः | नेष्यन्ति |
| मध्यमपुरुषः | नेष्यसि | नेष्यथः | नेष्यथ |
| उत्तमपुरुषः | नेष्यामि | नेष्यावः | नेष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अनयत् | अनयताम् | अनयन् |
| मध्यमपुरुषः | अनयः | अनयतम् | अनयत |
| उत्तमपुरुषः | अनयम् | अनयाव | अनयाम |

## 21.डु कृञ् - करणे

(१)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | करोति | कुरुतः | कुर्वन्ति |
| मध्यमपुरुषः | करोषे | कुरुथः | कुरुथ |
| उत्तमपुरुषः | करोमि | कुर्वः | कुर्मः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करिष्यति | करिष्यतः | करिष्यन्ति |
| मध्यमपुरुषः | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तमपुरुषः | करिष्यामि | करिष्यावः | करिष्यामः |

(३) लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमपुरुषः | अकरोः | अकुरुतम् | अकुरुत |
| उत्तमपुरुषः | अकरवम् | अकरवाव | अकरवाम |

## 22. चुर - स्तेये

(१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चोरयति | चोरयतः | चोरयन्ति |
| मध्यमपुरुषः | चोरयसि | चोरयथः | चोरयथ |
| उत्तमपुरुषः | चोरयामि | चोरयावः | चोरयामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चोरयिष्यति | चोरयिष्यतः | चोरयिष्यन्ति |
| मध्यमपुरुषः | चोरयिष्यसि | चोरयिष्यथः | चोरयिष्यथ |
| उत्तमपुरुषः | चोरयिष्यामि | चोरयिष्यावः | चोरयिष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अचोरयत् | अचोरयताम् | अचोरयन् |
| मध्यमपुरुषः | अचोरयः | अचोरयतम् | अचोरयत |
| उत्तमपुरुषः | अचोरयम् | अचोरयाव | अचोरयाम |

## 23. प्रच्छ ज्ञीप्सायाम् प्रच्छ

(१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पृच्छति | पृच्छतः | पृच्छन्ति |
| मध्यमपुरुषः | पृच्छसि | पृच्छथः | पृच्छथ |
| उत्तमपुरुषः | पृच्छामि | पृच्छावः | पृच्छामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | प्रक्ष्यति | प्रक्ष्यथः | प्रक्ष्यन्ति |
| मध्यमपुरुषः | प्रक्ष्यसि | प्रक्ष्यथः | प्रक्ष्यथ |
| उत्तमपुरुषः | प्रक्ष्यामि | प्रक्ष्यावः | प्रक्ष्यामः |

(३) लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अपृच्छत् | अपृच्छताम् | अपृच्छन् |
| मध्यमपुरुषः | अपृच्छः | अपृच्छतम् | अपृच्छत |
| उत्तमपुरुषः | अपृच्छम् | अपृच्छाव | अपृच्छाम |

## 24. इष-इच्छायाम् (= To Desire)

सकर्मकः - परस्मैपदी-सेद

१)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | इच्छति | इच्छतः | इच्छन्ति |
| मध्यमपुरुषः | इच्छसि | इच्छथः | इच्छथ |
| उत्तमपुरुषः | इच्छामि | इच्छावः | इच्छामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | एषिष्यति | एषिष्यतः | एषिष्यन्ति |
| मध्यमपुरुषः | एषिष्यसि | एषिष्यथः | एषिष्यथ |
| उत्तमपुरुषः | एषिष्यामि | एषिष्यावः | एषिष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | ऐच्छत् | ऐच्छताम् | ऐच्छन् |
| मध्यमपुरुषः | ऐच्छः | ऐच्छतम् | ऐच्छत |
| उत्तमपुरुषः | ऐच्छम् | ऐच्छाव | ऐच्छाम |

## 25. अद-भक्षणे (=To eat)

१)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अत्ति | अत्तः | अदन्ति |
| मध्यमपुरुषः | अत्सि | अत्थः | अत्थ |
| उत्तमपुरुषः | अदमि | अद्वः | अदन्तु |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | एत्स्यति | अत्स्यतः | अत्स्यन्ति |
| मध्यमपुरुषः | अत्स्यसि | अत्स्यथः | अत्स्यथ |
| उत्तमपुरुषः | अत्स्यामि | अत्स्यावः | अत्स्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | आदत् | आत्ताम् | आदन् |
| मध्यमपुरुषः | आदः | आत्तम् | आत्त |
| उत्तमपुरुषः | आदम् | आद्व | आद्म |

१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भाति | भातः | भान्ति |
| मध्यमपुरुषः | भासि | भाथः | भाथ |
| उत्तमपुरुषः | भामि | भावः | भामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भास्यति | भास्यतः | भास्यन्ति |
| मध्यमपुरुषः | भास्यसि | भास्यथः | भास्यथ |
| उत्तमपुरुषः | भास्यामि | भास्यावः | भास्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अभात् | अभाताम् | अभुः, अभान् |
| मध्यमपुरुषः | अभाः | अभातम् | अभात् |
| उत्तमपुरुषः | अभाम् | अभाव | अभाम |

## 26. अस् सत्तायां वर्तमाने (वर्तमान रहना) परस्मैपदी ।

१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अस्ति | स्तः | सन्ति |
| मध्यमपुरुषः | असि | स्थः | स्थ |
| उत्तमपुरुषः | अस्मि | स्वः | स्मः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | आसीत् | आस्ताम् | आसन् |
| मध्यमपुरुषः | आसीः | आस्तम् | आस्त |
| उत्तमपुरुषः | आसम् | आस्व | आस्म |

## 27. प्रच्छ-ज्ञीप्सायाम् (= To Ask)

१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पृच्छिति | पृच्छतः | पृच्छन्ति |
| मध्यमपुरुषः | पृच्छसि | पृच्छथः | पृच्छथ |
| उत्तमपुरुषः | पृच्छामि | पृच्छावः | पृच्छामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | प्रक्ष्यति | प्रक्ष्यतः | प्रक्ष्यन्ति |
| मध्यमपुरुषः | प्रक्ष्यसि | प्रक्ष्यथः | प्रक्ष्यथ |
| उत्तमपुरुषः | प्रक्ष्यामि | प्रक्ष्यावः | प्रक्ष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपृच्छत् | अपृच्छताम् | अपृच्छन् |
| मध्यमपुरुषः | अपृच्छः | अपृच्छतम् | अपृच्छथ |
| उत्तमपुरुषः | अपृच्छम् | अपृच्छाव | अपृच्छाम |

## 28. कथ वाक्यप्रबन्धे (= To narrate) सकर्मकः परस्मैपदी-सेद

१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कथयति | कथयतः | कथयन्ति |
| मध्यमपुरुषः | कथयसि | कथयथः | कथयथ |
| उत्तमपुरुषः | कथयामि | कथयावः | कथयामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कथयिष्यति | कथयिष्यतः | कथयिष्यन्ति |
| मध्यमपुरुषः | कथयिष्यसि | कथयिष्यथः | कथयिष्यथ |
| उत्तमपुरुषः | कथयिष्यामि | कथयिष्यावः | कथयिष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपृच्छत् | अपृच्छताम् | अपृच्छन् |
| मध्यमपुरुषः | अपृच्छः | अपृच्छतम् | अपृच्छथ |
| उत्तमपुरुषः | अपृच्छम् | अपृच्छाव | अपृच्छाम |

**29. डुकृञ् कृ करणे (करना) सक. सेट्, उभयपदी ।**

१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करोति | कुरुतः | कुर्वन्ति |
| मध्यमपुरुषः | करोषि | कुरुथः | कुरुथ |
| उत्तमपुरुषः | करोमि | कुर्वः | कुर्मः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करिष्यति | करिष्यतः | करिष्यथ |
| मध्यमपुरुषः | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तमपुरुषः | करिष्यामि | करिष्यावः | करिष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमपुरुषः | अकरोः | अकुरुतम् | अकुरुत |
| उत्तमपुरुषः | अकरवम् | अकुर्व | अकुर्म |

**30. क्षि क्षये (नष्ट होना) अक. । अनिट् पर. ।**

१)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | क्षयति | क्षयतः | क्षयन्ति |
| मध्यमपुरुषः | क्षयसि | क्षयथः | क्षयथ |
| उत्तमपुरुषः | क्षयामि | क्षयावः | क्षयामः |

(२) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | क्षेष्यति | क्षेष्यतः | क्षेष्यन्ति |
| मध्यमपुरुषः | क्षेष्यसि | क्षेष्यथः | क्षेष्याथ |
| उत्तमपुरुषः | क्षेष्यामि | क्षेष्यावः | क्षेष्यामः |

(३)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अक्षयत् | अक्षयताम् | अक्षयत् |
| मध्यमपुरुषः | अक्षयः | अक्षयतम् | अक्षयत |
| उत्तमपुरुषः | अक्षयम् | अक्षयाव | अक्षयाम |

* * *

# BHAGAVADGEETHA

## (CHAPTER 12)

# UNIT-I
# श्रीमद्भगवद्गीता-द्वादशोऽध्यायः

**संरचना**

१.०. परिचयः
१.१. लक्ष्याणि
१.२.श्रीमद्भगवद्गीता -परिचयः
१.२.१.श्रीमद्भगवद्गीता-नेपथ्यम्
१.२.२.श्रीमद्भगवद्गीता -सङ्ग्रहस्वरूपम्
१.२.३.श्रीमद्भगवद्गीता-द्वादशोऽध्यायः(विषयसङ्क्षेपः)
१.२.४.श्रीमद्भगवद्गीता-वैशिष्ट्यम्
१.३.उपसंहारः
१.४.अभ्यासः

## १.०. परिचयः

प्राणिषु उत्तमः मानवः। तस्य सौकर्यवन्तं शरीरम्, विवेचनाय बुद्धिः, सुख,दुःखानुभवाय मनः, भावाविष्करणाय व्यक्ता भाषा, एते मानवस्य उत्तमत्वं प्रकटयन्ति। मानवः एतान् च सद्विनियोगं कुर्यात् । एषा च साधनसम्पत्तिः मनवस्य सहजतया सङ्कलिता एव । एतेषां स्थितिमात्रेण उपयोगः नैव सम्पादितो भवति। साधनद्वारा एते क्रियाशीलकाः(Activate)करणीयाः। एतेषां क्रियाशीलकतासम्पादनाय च बुद्धिकुशलतायाः अपि अपेक्षा अस्ति। बुद्धे वा ,मनसः वा सा कुशलता मानवेन प्रयत्नपूर्वकं सम्पादनीया एव भवति। बुद्धे कुशलतासम्पादनाय ज्ञानसम्पत्तिः आवश्यकी। प्रकृते तत् ज्ञानसम्पत्तिसाधकतया जनोद्धरणायैव भगवद्गीता अवतरिता।

## १.१. लक्ष्याणि

मानवस्य जीवनं त्रिधा भवति। भौतिकं जीवनम्, आध्यात्मिकं जीवनम् , दैविकं जीवनं चेति। त्रिष्वपि जीवनेषु मानवस्य त्रिकरणशुद्धि अपेक्षिता। अवगाहनापरता आवश्यकी। क्रियाशीलकता अधिगन्तव्या। पवित्रजीवनम् आवश्यकम्। सहनशीलता अभ्यसनीया। तत्परता साधनीया । एतान् एव साधनोपायान् कथयन्ति। एते च

स्थूलतः चत्वारः सन्ति। ते च क्रमे -१) कर्मयोगः, २)ज्ञानयोगः, ३)राजविद्याराजगुह्ययोगः,४) भक्तियोगश्च तत्र भगवद्गीतायां द्वादशोध्यायः भक्तियोगं बोधयति। भगवति मनसः स्थापनस्य क्रमशः शिक्षणं उद्दिष्टम्। एतत् पाठ्यांशस्य अध्ययनेन -

- श्रीमद्भगवद्गीतायाः नेपथ्यम् अवगन्तुं प्रभवति।
- चतुरः साधनमार्गान् उद्दिश्य भाषितुं समर्थो भवति।
- श्रीमद्भगवद्गीतायाः विषयसङ्ग्रहं लिखितुं समर्थो भवति।
- श्रीमद्भगवद्गीतायाः वैशिष्ट्यं पठितुं समर्थो भवति।

## १.२ श्रीमद्भगवद्गीता - परिचयः

### १.२.१.श्रीमद्भगवद्गीता-नेपथ्यम्

श्रीमद्भगवद्गीता श्रीमन्महाभारते अन्तर्गतः कश्चन अस्वतन्त्रः भागः। अतः श्रीमद्भगवद्गीतायाः अपि रचयिता व्यासमहर्षिः एव भवति। महाभारते मुख्यतमः घट्टः श्रीमद्भगवद्गीता। युद्धक्षेत्रे अर्जुनः, आत्मीयाः एव हन्तव्याः सञ्जाताः, इति विषादम् एति। परमदैन्येन बन्धून् हन्तुम् न इच्छति। क्षात्रं धर्मं विस्मृत्य कर्तव्यविमुखो भवति। सशरं चापं विसृजति । विषीदन् रथोपस्थः उपविशति। एवं विषादम् आप्तम् अर्जुनं भगवान् श्रीकृष्णः पुनः कर्तव्योपदेशव्याजेन गीताशास्त्रं बोधयति।

**सर्वोपनिषदो गावः, दोग्धा गोपालनन्दनः।**
**पार्थो वत्सः, सुधीर्भोक्ता , दुग्धं गीतामृतं महत्।।**

श्रीकृष्णः गोपालः, उपनिषदः गावः, अर्जुनः वत्सः, पिपासकाः सुधियः ,गीतामृतं च पयः। श्रीकृष्णः गोपालः, अर्जुनं वत्सं कृत्वा, उपनिषद्गोभ्यः गीतामृतं दोग्धि। बुद्धिमन्तः तत् गीतामृतं आस्वादयन्तु" इति गीताशास्त्रविदः श्रीमद्भगवद्गीतां उपनिषत्सारं प्रशंसन्ति। अत्र च कर्मयोगः ,ज्ञानयोगः, राजविद्या राजगुह्य योगः,भक्तियोगः इति चत्वारः साधनमार्गाः बोधिताः। फलानपेक्षया कर्मणः आचरणम् एव "निष्कामकर्मयोगः" इति गीताशास्त्रं प्रबोधयति।

सर्वोऽपि स्वस्य धर्मम् अवश्यम् आचरेत्। सत्कर्मानुष्ठानपरः दुर्गतिं न आप्नोति। अनन्यभक्त्या भजमानानां योगक्षेमम् अवश्यं भगवान् एव वहति। यः भगवन्तं शरणम् एति सः पापेभ्यः विमुक्तः भवति। शोकातीत स्थितिं च आप्नोति। एवमात्मकाः

विश्वजनीनसिद्धान्ताः बहवः भगवद्गीतायां वर्तन्ते। अत एव अयं गीताग्रन्थः दशदिशः प्रसिद्धः।

**१.२.२.श्रीमद्भगवद्गीता-सङ्ग्रहस्वरूपम्;**

भीष्मपर्वे (२५)पञ्चविंशतितमाध्यायतः (४२)द्विचत्वारिंशत्तमाध्यायं यावत् (१८)अष्टादशाध्यायानां समुदायः श्रीमद्भगवद्गीतारूपेण प्रख्यातः। श्रीमद् भगवद्गीतायां (७००) सप्तशतं श्लोकाः सन्ति। अध्यायानां विषयाणां च नाममात्रं परिचयः अत्र दीयते।

| श्रीमद्भगवद्गीतायाम् **अध्यायाः;** | **तत्र च विषयः** | **श्लोकसंख्या** |
|---|---|---|
| १.प्रथमोऽध्यायः | अर्जुनविषादयोगः | ४७ श्लोकाः |
| २.द्वितीयोऽध्यायः | सांख्ययोगः | ७२ श्लोकाः |
| ३.तृतीयोऽध्यायः | कर्मयोगः | ४३ श्लोकाः |
| ४.चतुर्थोऽध्यायः | ज्ञानयोगः | ४२ श्लोकाः |
| ५.पञ्चमोऽध्यायः | कर्मसंन्यासयोगः | २९ श्लोकाः |
| ६.षष्ठोऽध्यायः | आत्मसंयमयोगः | ४७ श्लोकाः |
| ७.सप्तमोऽध्यायः | ज्ञानविज्ञानयोगः | ३० श्लोकाः |
| ८.अष्टमोऽध्यायः | अक्षरपरब्रह्मयोगः | २८ श्लोकाः |
| ९.नवमोऽध्यायः | राजविद्याराजगुह्ययोगः | ३४ श्लोकाः |
| १०.दशमोऽध्यायः | विभूतियोगः | ४२ श्लोकाः |
| ११.एकादशोऽध्यायः | विश्वरूपसन्दर्शनयोगः | ५५ श्लोकाः |
| १२.द्वादशोऽध्यायः | भक्तियोगः | २० श्लोकाः |
| १३.त्रयोदशोऽध्यायः | क्षेत्रक्षेत्रज्ञविभागयोगः | ३४ श्लोकाः |
| १४.चतुर्दशोऽध्यायः | गुणत्रयविभागयोगः | २७ श्लोकाः |
| १५.पञ्चदशोऽध्यायः | पुरुषोत्तमप्राप्तियोगः | २० श्लोकाः |
| १६.षोडशोऽध्यायः | दैवासुरसंपद्विभागयोगः | २४ श्लोकाः |
| १७.सप्तदशोऽध्यायः | श्रद्धात्रयविभागयोगः | २८ श्लोकाः |
| १८.अष्टादशोऽध्यायः | मोक्षसंन्यासयोगः | ७८ श्लोकाः |

कस्मिंश्चित् महाग्रन्थे अन्तर्भागतया स्थितस्सन्नपि श्रीमद्भगवद्गीताभागः स्वतन्त्रग्रन्थः इव असमानकीर्तिं प्रतिष्ठां च आप्तः। अस्माकं प्राचीनामताचार्याः

गीतायाः प्राशस्त्यमवगम्यैव, तां प्रस्थानत्रये अन्यतमत्वेन योजिताः। विषयप्रामुख्यम् अनुसृत्य भगवद्गीतायाः बहूनि व्याख्यानानि रचितानि सन्ति। न केवलं भारतीयभाषास्वेव, अपि तु अनेकासु प्रपञ्चभाषासु अस्याः अनुवादाः सञ्जाताः। न केवलं हैन्दवैः एव,किन्तु सर्वैः पठनीयः सार्वजनीनः ग्रन्थराजः अयं गीताग्रन्थः।

### १.२.३.श्रीमद्भगवद्गीता-द्वादशोऽध्यायः(विषयसङ्क्षेपः);

भगवान् श्रीकृष्णः विश्वरूपसन्दर्शनयोगे यावत् विश्वम् आत्मनः शरीरतया प्रदर्शयति । अर्जुनश्च भगवतः विश्वरूपं दृष्ट्वा भयमाप्नोति। जीविनां मरणधर्मं प्रति अवगाहनापरो भवति। अखिलं ब्रम्हाण्डं भगवतः सङ्कल्पेन प्रचलतीति, तत्र च,सः आत्मानम् अत्यल्पं च मनुते। भगवति भक्ति अमिता भवति। अखिलं ब्रम्हाण्डं यदि शरीरं तर्हि, एतदखिलब्रम्हाण्डशरीरस्य धारी कः? अखिलस्य ब्रम्हाण्डस्य प्रवर्तिनी शक्तिः का? ब्रम्हाण्डस्य प्रवर्तनाय कियत् ज्ञानम् आवश्यकं भवेत् ? इति भ्रान्तस्सन् आश्चर्यचकितो भवति।

भगवतः आकारसेवनं(साकारोपासनम्) उचिता भक्तिः ? अथवा भगवतः शक्तेः ज्ञानस्य, अक्षरस्वरूपस्य च नाम भगवतः तत्तवस्य आराधनम् (निराकारोपासनम्) उचिता भक्तिः वा ? तयोः (साकार-निराकारोपासनयोः) उत्तमं किम् ? इति जिज्ञासितो भवति।

भगवान् च साकारोपासनं युक्ततमम् इति निराकारोपासनमार्गेणापि भगवान् प्राप्तुं शक्यः,परं देहाभिमानिनां निराकारोपासनमार्गः प्रयासकरः,किञ्च साकार-निराकारोपासनोपायान् अतीत्य भगवति मनसः बुद्धेः निवेशनम्, तदनुष्ठाने असमर्थस्य अभ्यासमार्गसूचनम्,तत्राप्यसमर्थस्य भगवतः कर्मसु भागस्वीकरणम्,तत्रापि विफलस्य सर्वकर्मफलत्यागः इत्येतान् मार्गान् सूचितवान्। सद्गुणसम्पन्नः,सामजिकः,स्नेहशीली, द्वन्द्वातीतःअरिषड्वर्गाणां विजेता ,नित्यसमतोषी भगवतः प्रीतिपात्रः। भगवतः निस्सृतं धर्म्यामृतं श्रद्धया ये पर्युपासते ते भगवतः अतीवप्रियाः :-

१.साकार- निराकारोपासनयोः उत्तमत्वस्य प्रकटनम्।
२.भगवतः साक्षात्काराय साकार- निराकारोपासन मार्गातीतया उपयान्तराणाम् संसूचनम्।
३.भगवतः साक्षात्कारमाप्तवतः पुरुषस्य लक्षणाणि च इति विषयत्रयम् अत्र प्रधानतया वर्णितम्।

### १.२.४.श्रीमद्भगवद्गीता-वैशिष्ट्यम्

श्रीमद्भगवद्गीता उत्तमः सार्वजनिकः ग्रन्थः। मनवजातिसमुद्धरणाय अनेन सदृशः ग्रन्थः न भूतः, न भविष्यतिच। मनवस्य वैयक्तिकम्, सामाजिकम्, भौतिकम्, बौद्धिकम्, मानसिकम्, आध्यात्मिकं च जीवनपथं निर्दिशति। **श्रीमद्भगवद्गीता** एकं महत्वपूर्णं मनस्तत्त्वशास्त्रम्, शास्त्रीयपद्धत्या मनसः कालुष्यं निवारयति। भगवद्गीता एकं बुद्धिनिर्वहणाशास्त्रम् (Mind Management Science),बुद्धेः भ्रमम् अपाकरोति। यथार्थबुद्धिम् अनुगृह्णाति। प्रभाव पूर्णं सामाजिकं शास्त्रम्, मानवानां स्वस्ववृत्तिषु आदरणम् आचरणम् आराधनं च वर्धयति। भगवद्गीता च एकं तत्त्वशास्त्रम्, जगद्व्याप्तं ब्रह्मतत्त्वं बोधयति। भगवद्गीता मानवताशास्त्रम्, मानवस्य अभ्युदयाय मार्गं दर्शयति। एवं प्रभवपूर्णः अयं ग्रन्थः विश्वजनीनविषयान् बोधयति। मानवसययमनसः प्रवृत्तिं भिन्नभिन्नकोणेषु वेश्लेषयति। मानवं क्रियाशालिनं करोति। मनवं व्यवसायिनं करोति। अन्ततः तं दिव्यगुणसम्पन्नं करोति।

### १.३.उपसंहारः

एवम् अत्र श्रीमद्भगवद्गीता-नेपथ्यम्, श्रीमद्भगवद्गीता -स्वरूपम्, श्रीमद्भगवद्गीता- द्वादशोऽध्यायस्य विषयसङ्क्षेपः, श्रीमद्भगवद्गीतायाः वैशिष्ट्यम् इत्येते विषयाः श्रीमद्भगवद्गीता परिचयः इति नाम्ना अत्र प्रस्तुताः।

### १.४.अभ्यासः

१ श्रीमद्भगवद्गीतायाः रचयिता कः ?

२.श्रीमद्भगवद्गीतायां कः कम् कुत्र उपदिशति ?

३.साधनोपायाः(साधनमार्गाः) कति ? के च ते?

# UNIT- II
# उपासनम् - तद्गतद्वैविध्यम्

**संरचना**

२.०.परिचयः
२.१.लक्ष्याणि
२.२.उपासनम् - तद्गतद्वैविध्यम्
२.२.१.सगुण - निर्गुणोपासनसम्बन्धिप्रश्नकरणम्
२.२.२.सगुणोपासकानां युक्ततमत्वम्
२.२.३.निर्गुण-निराकारोपासनम्
२.२.४.निर्गुणोपासने क्लेशाधिक्यस्य प्रतिपादनम्
२.२.५.सगुणोपासनस्य प्राप्यम् प्रयोजनम् च
२.३.उपसंहारः
२.४.अभ्यासः

## २.०.परिचयः

उपासनम् -तद्गतद्वैविध्यम् इत्ययं पाठ्यांशः श्रीमद्भगवद्गीतायाः द्वादशोऽध्याये प्रथमश्लोकतः आरभ्य सप्तमश्लोकपर्यन्तं सप्तश्लोकेषु प्रवृत्तः। पूर्वत्र तत्र तत्र गीतायां भगवान् तावत् साकारेण -निराकारेण च मार्गेण परब्रह्मणः उपासनं प्रस्तौति। तत्र उभयोरप्यनयोः मार्गयोः युक्ततमतां प्रति अर्जुनस्य सन्देहः जायते । तदेतत् सन्दर्भं पुरस्कृत्य उपासनयोः युक्ततमत्वप्रतिपादनाय प्रधानतया उद्दिष्टः अयं पाठ्यांशः।

## २.१.लक्ष्याणि

प्राणिषु मानवः श्रेष्ठतमः। सः बुद्धिजीवः, विवेकसम्पन्नश्च। सः स्वस्य विवेकबुद्ध्यैव इतरान् अतिशेते। साधनमार्गम् अनुतिष्ठति। आत्मानम् अवगच्छति। पुरुषार्थान् साधयति। आत्मानम् अवगत्य पुरुषार्थसाधनाय प्रयत्नमेव उपासनं भवति। तत्र च साधकगतयोग्तानुसारेण उपासने अपि द्वैविध्यम् जातम्। यत्र आत्मा वा परब्रह्मा वा भगवान् वा आकारम्, गुणान् च अतीत्य सर्वव्यापकतया ध्यानयोग्यो भवति तत्र तत् उपासनं निराकारोपासनं भवति । यत्र आत्मा वा परब्रह्मा वा भगवान् वा,

आकारम्, गुणान् च आपाद्य अर्चनामूर्तिरूपेण परिमितिषु ध्यानयोग्यो भवति तत्र तत् उपासनं साकारोपासनं भवति । उभयोरप्युपासनयोः, आत्मानः अवगमनं प्रति, आलोचनागतव्यत्यासम् एव कारणम्। स च व्यत्यासः अत्र पाठ्यांशे बोध्यते। एतत् पाठ्यांशस्य अध्ययनेन-

- अर्जुनस्य सन्देहस्वरूपम् अवगन्तुं प्रभवति।
- साकारोपासनस्य उत्तमत्वं भाषितुं पारयति।
- निराकारोपासनस्य स्वरूपं पठितुं समर्थो भवति।
- निराकारोपासने देहाभिमानिनां क्लेशस्य आधिक्यं प्रति लिखितुं शक्नोति।

## २.२.उपासनम् - तद्गतद्वैविध्यम्

### २.२.१.सगुण - निर्गुणोपासनसम्बन्धिप्रश्नकरणम्

**एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।**
**ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ।। १ ।।**

**श्लोकपरिचयः-**अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषयपरतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः, किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः-**सगुणोपासनं वर्णितम्,निर्गुणोपासनं च वर्णितम्,तयोः किमुपासकाः श्रेष्ठतमाः ? इति जिज्ञासुः सन् अर्जुनः विषयम् इमं श्रीकृष्णं पृच्छति इत्यस्मिन् सन्दर्भे अयं श्लोकः वर्तते।

**पदविभागः -** एवम्, सततयुक्ताः, ये, भक्ताः, त्वाम्, पर्युपासते। ये, च, अपि, अक्षरम्, अव्यक्तम्, तेषाम्, के, योगवित्तमाः।।

**अन्वयक्रमः** - एवम्, त्वाम्, सततयुक्ताः, ये भक्ताः, च, ये, अक्षरम्, अव्यक्तम्, अपि, पर्युपासते, तेषाम्, योगवित्तमाः, के, (सन्ति)।

**प्रतिपदार्थः -** एवम् = पूर्वं प्रतिपादितरीत्या अनन्यभक्त्या; त्वाम् = भगवन्तं भवन्तं श्रीकृष्णम् ; सततयुक्ताः, सतत = निरन्तरम्, युक्ताः = भजनध्यानादिभिः पूजयन्तः ,ये भक्ताः = ये उपासकाः; च = अपि च ; ये (भक्ताः) = ये उपासकाः; अक्षरम् = नाशरहितम्; व्यक्तम् = निराकारम् ;पर्युपासते = एकाग्रचित्ताः सन्तः भजन्ते ,तेषाम् = सगुण-निर्गुणोपासकानाम् मध्ये , योगवित्तमा = श्रेष्ठाः योगज्ञानवन्तः; के(सन्ति) = के भवन्ति;

**श्लोकभावः** - इतः पूर्वं एकाशोध्यायः, विश्वरूपसन्दर्शनयोगः। एतावत्पर्यन्तं श्रीकृष्णः यथावकाशं सगुणोपासनं निर्गुणोपासनं च च वर्णितवान्,विवृतवान् च। तत्र अर्जुनस्य जिज्ञासा जाता। तस्य इमां जिज्ञासां"भगवन्! श्रीकृष्ण! भवद्भिः कुत्रचित् सगुणोपासनं समर्थितम्। अपरत्र कुत्रचित् निर्गुणोपासनं अभिवर्णितम्। केचित् अनन्यप्रेम्णा भजनध्यानादिभिः परमेश्वरस्य तव सगुणरूपं दृढविश्वासेन उपासन्ते,ते सगुणोपासकाः भवन्ति। अपरे केचित् सर्वव्यापकस्य अव्यक्तस्य परमेश्वरस्य तव निर्गुणरूपम् अर्चयन्ति, ते निर्गुणोपासकाः भवन्ति। एतौ द्वावप्युपासकौ तत्र तत्र त्वत्समर्थितमार्गावेव अनुसृतौ। तयोः श्रेष्ठतमः उपासकः कः ? 'इति अर्जुनः श्रीकृष्णं पृच्छति।

**व्याकरणांशाः** -पर्युपासते; परि+ उपासते (इ + उ = य्) यणादेशसन्धिः।
चापि; च+अपि (अ + अ = आ) सवर्णदीर्घसन्धिः ।
अप्यक्षरम्;अपि+ अक्षरम् (इ+अ = य्) यणादेशसन्धिः ।

**स्वावलोकनप्रश्नाः**

१.'ये भक्तास्त्वां पर्युपासते' अत्र 'त्वाम्' इत्यनेन बोध्यं किम् ?

२.'तेषां के योगवित्तमाः.'अत्र 'तेषाम्'इति पदं कान् सम्बन्धयति ?

### २.२.२.सगुणोपासकानां युक्ततमत्वम्

**मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।**
**श्रद्धया परयोपेताः ते मे युक्ततमा मताः ।। २ ।।**

**श्लोकपरिचयः**–अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषयपरतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः** -सगुण-निर्गुणोपासनयोः मध्ये सगुणोपासनम् अपि युक्ततमम् इति श्रीकृष्णः अर्जुनम् उत्तरयति इत्यस्मिन् सन्दर्भे अयं श्लोकः वर्तते।

**पदविभागः-** मयि, आवेश्य, मनः, ये, माम्, नित्ययुक्ताः, उपासते। श्रद्धया, परया, उपेताः, ते, मे, युक्ततमाः, मताः।।

**अन्वयक्रमः-** ये, मयि, मनः, आवेश्य, नित्ययुक्ताः, ये, परया, श्रद्धया, उपेताः, माम्, उपासते, ते, मे, युक्ततमाः, मताः।

**प्रतिपदार्थः** -ये = उपासनशीलाः ;मयि = भगवति श्रीकृष्णे ; मनः = चित्तम् ; आवेश्य = निक्षिप्य, संलग्नं कृत्वा; नित्ययुक्ताः, नित्य = निरन्तरम्; युक्ताः = भजनध्यानादिभिः अर्चयन्तः; परया = महत्या; श्रद्धया = भक्त्या ; उपेताः = सहितास्सन्तः; माम् = सगुणस्वरूपं मां श्रीकृष्णम् ; उपासते = पूजयन्ति; ते = तादृशाः सगुण-साकारोपासकाः; मे = भगवतः श्रीकृष्णस्य ; युक्ततमाः = योगिषु अत्यन्तम् उत्तमाः; मताः = भाविताः।

**श्लोकभावः**- एवम् अर्जुनस्य प्रश्नं श्रुत्वा ,श्रीकृष्णः एवम् 'अर्जुन! त्वदुक्तरीत्या केचित् , तेषां मनः बुद्धिं च मयि निवेशयन्ति। तेषां वेदेषु,शास्त्रेषु, महतां वाक्येषु, च विश्वसनीयता अधिका। सैव श्रद्धा भवति। श्रद्धया सततं भजनध्यानादिभिः माम् एव आराधयन्ति। माम् एव शरणं यान्ति । तादृशाः सगुणोपासकाः भवन्ति। ते मम योगिष्वपि अत्युत्तमत्वेन अभिमताः' इति उत्तरं ददाति। अर्थात् सगुणोपासनम् अपि श्रेष्ठम्, सगुणोपासकः अपि श्रेष्ठतमः इति अर्जुनस्य समाधनम् आगतम् इति भावनीयम् ।

**व्याकरणांशाः-**

सन्धयः मय्यावेश्य ; मयि + आवेश्य (इ+आ=य्) यणादेशसन्धिः।

परयोपेताः ; परया + उपेताः (आ+उ=ओ) गुणसन्धिः।

**स्वावलोकनप्रश्नाः**

१. श्रद्धा नाम का ?

२. 'ते मे युक्ततमाः,मताः 'अत्र 'ते ' पदं कं सम्बन्धयति?

३. अत्र 'मे ' पदं कं सम्बन्धयति?

### २.२.३.निर्गुण-निराकारोपासनम्

**ये त्वक्षरमनिर्देश्यम् अव्यक्तं पर्युपासते।**
**सर्वत्रगमचिन्त्यम् च कूटस्थमचलं ध्रुवम्।।३।।**

**संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।।**
**ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः।।४।।**

**श्लोकपरिचयः-** अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषयपरतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः-**निर्गुणोपासनस्य स्वरूपम्-स्वभावञ्च श्रीकृष्णः अर्जुनाय विवृणोति इत्यस्मिन् सन्दर्भे अयं श्लोकः वर्तते।

**पदविभागः -** ये, तु, अक्षरम्, अनिर्देश्यम्, अव्यक्तम्, पर्युपासते। सर्वत्रगम्, अचिन्त्यम्, च, कूटस्थम्, अचलम्, ध्रुवम्।।

संनियम्य, इन्द्रियग्रामम्, सर्वत्र, समबुद्धयः। ते, प्राप्नुवन्ति, माम्, एव, सर्वभूतहिते, रताः।।

**अन्वयक्रमः -** ये,तु, इन्द्रियग्रामम्, संन्नियम्य, अचिन्त्यम्, सर्वत्रगम्, अनिर्देश्यम्, च, कूटस्थम्, ध्रुवम्, अचलम्, अव्यक्तम्, अक्षरम्, पर्युपासते, सर्वभूतहितेरताः, सर्वत्र-समबुद्धयः, ते, माम्, एव, प्राप्नुवन्ति, ।

**प्रतिपदार्थः-** ये = उपासकाः ये भक्ताः; तु = मात्रम्;इन्द्रियग्रामम् ,इन्द्रिय = त्वक्-चक्षुष्-श्रोत्र-जिह्वा-घ्राणात्मकानां पञ्चानां ज्ञानेन्द्रियाणाम्; ग्रामम् = समुदायम्; सन्नियम्य = वशीकृत्य; अचिन्त्यम् = विचारणाय बुद्धेः अगोचरम्; सर्वत्रगम् = सर्वव्यापिनम् ; अनिर्देश्यम् = निर्देष्टुम् अशक्यम्;च = अपि च; कूटस्थम् = परिणामरहितं, निर्विकारम्; ध्रुवम् = स्थिरम्; अचलम् = निश्चलम्; अव्यक्तम् = निराकारम्; अक्षरम् = नाशरहितम्,शाश्वतम्,परब्रह्माणम्; पर्युपासते = एकाग्रेण उपासनं कुर्वन्ति ; ते = तादृशाः उपासकाः; सर्वभूतहिते, सर्व = समस्तानाम्; भूत = प्राणिनाम्; हिते = श्रेयसि ; रताः = आसक्ताः; सर्वत्र = सर्वप्राणिषु; समबुद्धयः,सम = समान ; बुद्धयः = बुद्धिशीलाः सन्तः माम् = भगवन्तम् माम्; एव = केवलम् ; प्राप्नुवन्ति = लभन्ते;

**श्लोकभावः** - प्रसङ्गवशात् अत्र च पद्ये भगवतः निर्गुण-निराकारब्रह्मणः स्वरूपम्, निराकारब्रह्मणः उपासनम्, निराकारब्रह्मणः उपासकानां प्राप्यं च अभिवर्णितम्। तथा हि-निर्गुणब्रह्मणः स्वरूपम्; अत्र च उपासनक्रमे भगवतः निर्दिष्टः आकारः न विद्यते। अत्र च भगवान् यत्किञ्चिदापादयितुम् अपि अशक्यः। एवम् अयम् आकार रहितः (निराकारः) गुणरहितश्च (निर्गणः) भवति। आकाश इव सर्वत्र व्यापनशीलः। किञ्च युक्त्या विचारणाय अयं बुद्धेः अगोचरः। वचसा स्वरूपं स्वभावं विधानं च निर्वक्तुम् च अशक्यः,अनिर्वचनीयः। सः यत्किमपि विकारं न सहते। सर्वदा एकात्मनैव विद्यते। अयं स्थिरः,नित्यः शाश्वतिकः,चलनरहितः,अव्यक्तरूपः, अव्यक्तस्वभावः, अव्यक्त विधानश्च। एवम् अयम् अव्यक्तश्च जातः। नाशरहितश्च इत्येवं निर्गुणब्रह्मणः स्वरूपम् अभिवर्णितम्।

निराकारब्रह्मणः उपासनम्; इन्द्रियाणि इन्द्रियार्थविषयेभ्यः निवर्तयेत्। इन्द्रियाणि च वशं कुर्यात्। सर्वत्र समान बुद्धिं साधयेत् । एकात्मकताद्दृष्टिः अभ्यसनीया भवेत्। मनश्च एकाग्रं कुर्यात्। तदा सच्चिदानन्दघनशीलिनं सर्वत्र भावयन् निराकारब्रह्माणम् उपासीत इत्येवं निर्गुणब्रह्मणः उपासनम् अभिवर्णितम्।

निर्गुणब्रह्मणः उपासकस्य प्राप्यम्;निर्गुणोपासकाश्च अपि सर्वत्र समानबुद्धिं सम्पादयन्ति खलु। तया बुद्ध्या सर्वेषु भूतेषु आत्मनः चैतन्यं अनुपश्यति। आत्मवत् सर्वभूतेषु प्रवर्तते। एवं सर्वेषां भूतानां हितैषी भवति। तथा तेषां हिते आसक्ताः सन्तः भगवतः साक्षात्कारम् अधिगच्छन्ति। भगवतः सायुज्यं प्राप्नुवन्ति इत्येवं निर्गुणब्रह्मणः उपासकस्य प्राप्यमपि अभिवर्णितम्।

**व्याकरकणांशाः-**सन्धयः सन्नियम्येन्द्रियग्रामम्; सन्नियम्य + इन्द्रियग्रामम् (अ + इ = ए) गुणसन्धिः।
ये त्वक्षरम् ; ये तु,+ अक्षरम्(उ + अ = व्) यणादेशसन्धिः।

**स्वावलोकनप्रश्नाः**

१.इन्द्रियग्रामः कः ?

२.' ते प्राप्नुवन्ति माम् एव ' अत्र 'माम् ' पदं कं सम्बन्धयति?

### २.२.४.निर्गुणोपासने क्लेशाधिक्यस्य प्रतिपादनम्

**क्लेशोऽधिकतरस्तेषाम् अव्यक्तासक्तचेतसाम् ।**
**अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ।। ५।।**

**श्लोकपरिचयः–**अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषयपरतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः** -देहाभिमानिनां निर्गुणोपासनं कष्टसाध्यम् इति भगवान् श्रीकृष्णः अर्जुनं प्रबोधयति इत्यस्मिन् सन्दर्भे अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये भक्तियोगे वर्तते।

**पदविभागः** - क्लेशः, अधिकतरः, तेषाम्, अव्यक्तासक्तचेतसाम् । अव्यक्ता, हि, गतिः, दुःखम्, देहवद्भिः, अवाप्यते ।।

**अन्वयक्रमः** - अव्यक्तासक्तचेतसाम्,तेषाम्, क्लेशः, अधिकतरः हि, देहवद्भिः, अव्यक्ता,गतिः,
दुःखम्, अवाप्यते।

**प्रतिपदार्थः** - अव्यक्तासक्तचेतसाम्, अव्यक्त = निराकारब्रह्मणि ; आसक्त = संलग्न ; चेतसाम् = चित्तानाम् ;तेषाम् = निर्गुण-निराकारोपासकानाम् ; क्लेशः = (साधने) प्रयासः; अधिकतरः = महत्तरः (विद्यते) ; हि = यस्मात् कारणात् ; देहवद्भिः = (शरीरधारिभिः) देहाभिमानिभिः ; अव्यक्ता = निराकारब्रह्मोपासना (याः); गतिः = अवगतिः; दुःखम् = कष्टम्; अवाप्यते = प्राप्यते।

**श्लोकभावः**- मानवाः देहधारिणः। जगति मानवाः देहसंरक्षणमेव सर्वस्वं मन्यन्ते। नाम देहः,देहगतानि इन्द्रियाणि, तदर्थविषयसङ्ग्रहणे एव देहधारिभिः मनसः बुद्धेश्च शक्तिः उपयुज्यते। शरीरसुखमेव जीवनसुखं भावयन्ति। एवम् एते देहाभिमानिनः जाताः। निराकारोपासनक्रमे तावत् भगवान् अव्यक्तरूपः,सर्वव्यापी च। मनः संलग्नं कृत्वा इन्द्रियाणि वशीकृत्य निराकारब्रह्माणं (भगवन्तम्)उपासीत। ते एव अव्यक्ते ब्रह्मणि संसक्तचेतसः निराकारोपासकाः। तदु- पासनापद्धत्यवगमनं, शरीरे शरीरसुखेषु च वीतरागिणामेव साध्यम्। मानवाश्च प्रकृत्या देहा-भिमानिनः। एवं देहाभिमानिनां निराकारब्रह्मणः उपासनम् अधिकं क्लेशं जनयति। सामान्यतः निराकारस्य ब्रह्मणः उपासनापेक्षया साकारस्य ब्रह्मणः उपासनमेवश्रेष्ठतमं भवति इति भगवान् श्रीकृष्णः अर्जुनाय साकारोपासनस्य युक्ततमत्वं बोधयति।

**व्याकरणांशाः**- सन्धयः क्लेशोऽधिकतरः क्लेशः + अधिकतरः(अः+अ = ओऽ)विसर्गसन्धिः/ पूर्वरूपसन्धिः।
अव्यक्तासक्त ; अव्यक्त + आसक्त (अ + आ = आ) गुणसन्धिः।

| **स्वावलोकनप्रश्नाः** |
|---|
| १'तेषाम् अव्यक्तासक्तचेतसाम् 'अत्र 'तेषाम् ' पदं कान् सम्बन्धयति ? |
| २.'अव्यक्ता गतिः' नाम का ? |

### २.२.५.सगुणोपासनस्य प्राप्यं प्रयोजनं च

**ये तु सर्वाणि कर्माणि मयि सन्यस्य मत्पराः।**
**अनन्येनैव योगेन मां ध्यायन्त उपासते।। ६ ।।**

**तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।**
**भवामि न चिरात् पार्थ मय्यावेशितचेतसाम् ।। ७।।**

**श्लोकपरिचयः–**अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषयपरतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः** -सगुणोपासनतः भगवतः साक्षात्कारम् अनायासेन,अचिरात् एव लभते,इति श्रीकृष्णः अर्जुनं प्रबोधयति इत्यस्मिन् सन्दर्भे अयं श्लोकः वर्तते।।

**पदविभागः** - ये, तु, सर्वाणि, कर्माणि, मयि, सन्यस्य, मत्पराः। अनन्येन, एव, योगेन, माम्, ध्यायन्तः, उपासते।।
तेषाम्, अहम्, समुद्धर्ता, मृत्युसंसारसागरात्। भवामि, न, चिरात्, पार्थ, मयि, आवेशितचेतसाम्।।

**अन्वयक्रमः** - पार्थ ! ये, तु, मत्पराः, सर्वाणि कर्माणि, मयि, सन्यस्य, अनन्येन, योगेन,माम्, एव, ध्यायन्तः ,उपासते, तेषाम् , मय्यावेशितचेतसाम्, अहम्, न, चिरात्,समुद्धर्ता, भवामि।

**प्रतिपदार्थः**- पार्थ ! = अर्जुन ; ये = उपासकाः ये भक्ताः; तु = मात्रम्; मत्पराः,

मत् = मयि भगवति श्रीकृष्णे ; पराः = परायणाः भूत्वा ; सर्वाणि उ समस्तानि; कर्माणि = कार्याणि ; मयि = भगवति श्रीकृष्णे; सन्यस्यउविधेय तया समर्प्य; अनन्येन = तदेकेन; योगेन = साधनमार्गेण ; माम् = भगवन्तं श्रीकृष्णम् ; एव = केवलम्; ध्यायन्तः = चिन्तयन्तः; उपासते = पूजयन्ति; तेषाम् = तादृशानाम्; मयि = मयि भगवति श्रीकृष्णे ;आवेशितचेतसाम्, आवेशित = संस्थापित ; चेतसाम् = चित्तानाम् ; अहम् = भगवान् श्रीकृष्णः ; न चिरात् = शीघ्रम् ; मृत्युसंसारसागरात्, मृत्यु = मरण ; संसार = भव ; सागरात् = समुद्रात्; समुद्धर्ता = समुद्धारकः ; भवामि = अस्मि ;

**श्लोकभावः** -'अर्जुन ! आराधनाशीलः प्रथमम् उपासकः भवति । उपासकः तदेकमार्गेण भगवन्तं ध्यायति। भगवच्चिन्तनशीलश्च भवति। भगवच्चिन्तनशीलश्च सर्वोऽपि सदा किमपि कर्म करोत्येव। तानि सर्वाण्यपि कर्माणि तत्परोभूत्वा आचरेत् । आचरितानि च सर्वाण्यपि कर्माणि श्रीकृष्णे भगवति (मयि) संन्यसेत्। नाम फलम् अनपेक्ष्य, श्रद्धापूर्वकं कुर्वन् आचरितानि कर्माणि च भगवदर्पणं कुर्यात्। इमम् एव अनन्ययोगं कथयन्ति।

मृत्युः नाम मरणशीलः इत्यर्थः। संसारश्च सागरोपमः। यथा मकरतिमिङ्गिलादयः जलजन्तवः सागरे अवतीर्णम् उत्कृत्य मरणं प्रापयन्ति, तथा संसारे अवतीर्णं कामिनं रागिणं भोगिनं च जनं इर्द्रियाणि, मनः, विवेकहीनता इत्येवमादयः समुन्नतिम् अप्रापयित्वा समुचितपथः भ्रष्टं कुर्वन्ति। एवं संसारः सागरो भूत्वा जनान् मारयति । मृत्युसंसारसागरः नाम एष एव। मानवान् मरणस्वभावेषु प्रवर्तयति। श्रेयसः मार्गे अवतरणाय विलम्बं जनयति। अतः अयञ्च महान् प्रमादकरः।

ये च उपासकाः अनन्ययोगेन मनः पूर्वकं (माम्) भगवन्तम् सगुणं साकारम् उपासते, अचिरात् एव भगवान् (अहम्) कारुणिको भूत्वा अतिभयावहात् मृत्युसंसारसागरात् तेषाम् उपासकानां समुद्धारकः भवति' श्रीकृष्णः अर्जुनाय सगुणोपासनस्य प्राप्यं प्रयोजनं च प्रबोधयति।

**व्याकरणांशाः ;सन्धयः-** अनन्येनैव ; अनन्येन +एव (अ + ए = ऐ) वृद्धिसन्धिः।
मय्यावेशित... ; मयि+ आवेशित... (इ + आ = य्) यणादेशसन्धिः।

**स्वावलोकनप्रश्नाः**

१'तेषाम् अहम् समुद्धर्ता, 'अत्र 'तेषाम् ' पदं कान् सम्बन्धयति ?

२.'मयि, सन्यस्य, मत्पराः।' अत्र 'मयि ' पदं कं सम्बन्धयति ?

## २.३.उपसंहारः

एवम् अत्र सगुण-निर्गुणोपासनसम्बन्धिप्रश्नकरणम्, सगुणोपासकानां युक्ततमत्वम्, निर्गुण-निराकारोपासनम्, निर्गुणोपासने क्लेशाधिक्यस्य प्रतिपादनम्,सगुणोपासनस्य प्राप्यम् प्रयोजनम् च इत्येते विषयाः निरूपिताः।

## २.४.अभ्यासः

अ) उपासनगतद्वैविध्यं प्रति यावदवगतं दशसु वाक्येषु लिखत?

# UNIT-III
# सगुणोपासकाय उपायानां कथनम्

**संरचना**

३.०.परिचयः
३.१.लक्ष्याणि
३.२.सगुणोपासकाय उपायानां कथनम्
३.२.१. सगुणोपासकाय प्रथमोपायवर्णनम्
३.२.२. सगुणोपासकाय उपायान्तरवर्णनम्
३.२.३. सगुणोपासकाय इतोऽप्यन्यस्य उपायस्य सूचनम्
३.२.४. कर्मफलत्यागात्मकस्य उपायान्तरस्यापि संसूचनम्
३.२.५. कर्मफलत्यागस्य प्राशस्त्यम्
३.३.उपसंहारः
३.४.अभ्यासः

## ३.०.परिचयः

'सगुणोपासनाय उपायानां कथनम्' इत्ययं पाठ्यांशः श्रीमद्भगवद्गीतायाः द्वादशोऽध्याये अष्टमश्लोकतः आरभ्य द्वादशतमश्लोकपर्यन्तं पञ्चश्लोकेषु प्रवृत्तः। उपासकाः द्विविधाः। साकारोपासकाः निराकारोपासकाश्चेति। ते एव सगुणोपासकाः निर्गुणोपासकाश्च भवन्ति। वस्तुतः निराकारोपासकाः(निर्गुणोपासकाः) एते एव उत्तमाः। साकारोपासकाः(सगुणोपासकाः) ततः पश्चादेव। साकारोपासकानां निराकारोपासनपद्धत्याः अवगमनाय,अभ्यसनाय अनन्तरं तेषामपि अपि निराकारोपासनाभ्युन्नतिप्राप्त्यै मनस्तत्त्वशास्त्रसम्बन्धिनः केचन उपायाः निर्दिष्टाः। तत्स्वरूपावगतये प्रवत्तः अयं पाठ्यांशः।

## ३.१.लक्ष्याणि

सगुणोपासकानाम् अपि युक्ततमत्वं यद्यपि विद्यते तथापि समुन्नतं , निर्गुणोपासनविधानम् आप्तुम् निबद्धतया प्रयत्नः कार्यः। तदर्थं च १) भगवति मनसः बुद्धेश्च स्थापनम्,२) अभ्यास मार्गानुसरणम्, ३) भगवद्विषयककर्माचरणम्, ४) कर्मफलस्य भगवदर्पणम्

इत्येते मार्गाः सूचिताः। तन्मार्गस्य विधिविधानज्ञापनं एतत् पाठ्यांशस्य लक्ष्यम् अस्ति। एतत् पाठ्यांशस्य अध्ययनेन-

- मनसः बुद्धेश्च एकाग्रताविधानम् अवगन्तुं प्रभवति।
- नित्यजीवने, तथा आध्यात्मिकप्रपञ्चे अपि अभ्यासस्य प्राधान्यं पठितुं प्रभवति।
- भगवद्विषयककर्माचरणे अनुभूतिं भाषितुं (व्यक्तीकर्तुम्) समर्थो भवति।
- कर्मफलत्यागस्य प्राशस्त्यं लिखितुं पारयति।

## ३.२.सगुणोपासनाय उपायानां कथनम्

३.२.१. सगुणोपासनाय प्रथमोपायवर्णनम्

**मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।**
**निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ।। ८ ।।**

**श्लोकपरिचयः-**अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषय परतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः** –सगुणोपासनद्वारा अपि भगवतः साक्षात्कारम् अनायासेन,अचिरात् एव लभते, इति श्रीकृष्णः अर्जुनं प्रबोधयति इत्यस्मिन् सन्दर्भे अयं श्लोकः वर्तते।

**पदविभागः** - मयि, एव, मनः, आधत्स्व, मयि, बुद्धिम्, निवेशय। निवसिष्यसि, मयि, एव, अतः, ऊर्ध्वम्, न, संशयः।।

**अन्वयक्रमः** - पार्थ! मयि, मनः, आधत्स्व,मयि एव, बुद्धिम्, निवेशय, अतः ऊर्ध्वम्, मयि एव, निवसिष्यसि, संशयः न।

**प्रतिपदार्थः** :- पार्थ = अर्जुन; मयि = भगवति मयि श्रीकृष्णे ;मनः = चित्तम्;आधत्स्व = संलग्नं कुरु;मयि = भगवति मयि श्रीकृष्णे; एव = केवलम्; बुद्धिम् = धियम्; निवेशय = संस्थापय; अतः = इतः ;ऊर्ध्वम् = परम् ; मयि = भगवति श्रीकृष्णे ; एव = केवलम्; निवसिष्यसि = निवासं करिष्यसि ; संशयः = (अस्मिन् विषये) सन्देहः; न = नास्ति।

**श्लोकभावः** -'अर्जुन! निर्गुणनिराकार-सगुणसाकारोपासनयोः सगुणसाकारोपासनम् अपि श्रेष्ठतमम्। देहाभिमानिनां निर्गुणनिराकारविधानं कष्टसाध्यम्। सुलभं प्रयोजनसाधकं च सगुणसाकारोपासनम् आचरतु। तदर्थं च (मम) भगवतः उपासको भव। अनन्यया भक्त्या चित्तं (मयि) भगवति संलग्नं कर्तुं प्रयत्नं कुरु। भगवदेकमनस्को भव। बुद्धिं विवेकसम्पन्नं साधय। विवेकबुद्धिं च (मयि) भगवति संयोजय। बुद्धेः (मयि) भगवति संयोजनानन्तरं उपासकः (त्वम्) भगवतः सान्निध्यं लभसे। भगवति एव निवसिष्यसि। अस्मिन् च विषये कोऽपि सन्देहः नास्ति' इति भगवान् श्रीकृष्णः अर्जुनं सन्दिशति।

**व्याकरणांशाः-** सन्धयः-मय्येव ; मयि+ एव (इ + ए = य्) यणादेशसन्धिः।
मन आधत्स्व ; मनः + आधत्स्व (अः + आ = विसर्गलोपः) विसर्गसन्धिः।

> **स्वावलोकनप्रश्नाः**
>
> १.सगुणोपासनाय किं किम् आवश्यकम् ?
>
> २.' निवसिष्यसि मयि एव ' अत्र 'मयि ' पदं कं सम्बन्धयति ?

### ३.२.२ सगुणोपासनाय उपायान्तरवर्णनम्

**अथ चित्तं समाधातुम्, न शक्नोषि मयि स्थिरम् ।**
**अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ।। ९ ।।**

**श्लोकपरिचयः-**अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषय परतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः :-** सगुणोपासनमपि वरम्, सगुणोपासनाय अभ्यासयोगः अन्यतमः मार्गः अस्ति इति श्रीकृष्णः अर्जुनं प्रबोधयति इत्यस्मिन् सन्दर्भे अयं श्लोकः वर्तते।

**पदविभागः :-** अथ, चित्तम्, समाधातुम्, न ,शक्नोषि, मयि, स्थिरम्। अभ्यासयोगेन, ततः, माम्, इच्छ, आप्तुम्, धनञ्जय।।

**अन्वयक्रमः**- धनञ्जय ! अथ, चित्तम्, मयि, स्थिरम्,समाधातुम्,न शक्नोषि,ततः,अभ्यासयोगेन, माम्, आप्तुम्,इच्छ।

**प्रतिपदार्थः -** धनञ्जय = अर्जुन !;अथ = यदि; चित्तम् = चेतः; मयि = भगवति मयि श्रीकृष्णे ; स्थिरम् = दृढतया; समाधातुम् = स्थापयितुम् ; न शक्नोषि = समर्थः न भवसि ; ततः = तर्हि ; अभ्यासयोगेन = पुनः पुनः प्रयत्नकरण पद्धत्या ; माम् = भगवन्तं मां श्रीकृष्णम् ; आप्तुम् = प्राप्तुम् ; इच्छ = अभिलषस्व ;

**श्लोकभावः;** 'अर्जुन ! भगवति मनसः स्थिरम् आधानं वा बुद्धेः निश्चलं निवेशनं वा कष्टतरम् एव। यदि भगवति मनसः स्थिरम् आधानं कष्टम्, बुद्धेः निवेशनं च असाध्यं भाव्यते ,तदा अभ्यास (practice) माध्यमेन भगवन्तम् आप्तुं प्रयत्नं कुरु। पुनः पुनः प्रयत्नकरणपद्धतेः एव अभ्यासयोग इति व्यवहारः। स च कर्मणि दृढमतिं वर्धयति। क्रियाशीलकतां जनयति। धियः जाड्यं हरति। कर्मणि संस्कारम् आदधाति। व्यवसायस्वभावम् , उद्यमनस्वभावं च अभ्यासयति। उद्योगिनम् उत्साहवन्तं करोति। उद्योगिनः निरुत्साहम् अपाकरोति। एवम् अभ्यासो हि कर्मणां कौशलम् आदधाति, (Practice makes man perfect ) इत्यादीनि वचनानि अभ्यासप्रक्रियायाः कार्यसाधकत्वं ख्यापयन्ति च। कष्टपूरितम्,असाध्यत्वेन च भावितं सर्वम् अपि अभ्यासेन क्रमेण अधिगन्तुं शक्यते ' इति भगवान् श्रीकृष्णः अभ्यासयोगं प्रति अर्जुनाय अवगाहनां कल्पयति।

**व्याकरणांशाः** -चित्तं समाधातुम्; चित्तम् + समाधातुम् (अम् + स् = अं) अनुस्वारसन्धिः।

इच्छाप्तुम् ; इच्छ + आप्तुम् (अ + आ = आ) सवर्णदीर्घसन्धिः।

**स्वावलोकनप्रश्नाः**

१.अभ्यासयोगो नाम कः ?

२.'अथ चित्तं समाधातुम् 'अत्र 'समाधातुम् ' पदस्य अर्थः कः ?

### ३.२.३ सगुणोपासनाय इतोऽप्यन्यस्य उपायस्य सूचनम्

**अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।**
**मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ।। १० ।।**

**श्लोकपरिचयः**-अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषयपरतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय, क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः**-सगुणोपासनमपि वरम्, सगुणोपासनाय भगवतः कर्मसु, तत्परतया भवनम् = श्रद्धया भागस्वीकरणम् (Dedicated Participation)अपि अन्यः मार्गः इति श्रीकृष्णः अर्जुनं बोधयति इति सन्दर्भे अयं श्लोकः वर्तते।

**पदविभागः :-** अभ्यासे,अपि,असमर्थः ,असि, मत्कर्मपरमः, भव। मदर्थम्, अपि, कर्माणि, कुर्वन्, सिद्धिम्, अवाप्स्यसि।।

**अन्वयक्रमः** :-(धनञ्जय,अथ) अभ्यासे,अपि,असमर्थः,असि,(ततः)मत्कर्मपरमः,भव,मदर्थम्, कर्माणि, कुर्वन्,अपि,सिद्धम्, अवाप्स्यसि।

**प्रतिपदार्थः** :-(धनञ्जय = अर्जुन!; अथ = यदि;) अभ्यासे = पुनः पुनः प्रयत्नकरणे; अपि = च; असमर्थः = अशक्तः; असि = भवसि; (ततः = तर्हि ;) मत्कर्मपरमः, मत् =भगवतः श्रीकृष्णस्य ;कर्म = यज्ञयागादिपूजाविधिषु ;परमः = श्रद्धया भागस्वामी; भव = भवितुम् अभिलषस्व ; मदर्थम् = भगवतः श्रीकृष्णस्य प्रीत्यर्थम्; कर्माणि = कार्याणि; कुर्वन्नपि = आचरन्नपि; सिद्धिम् = जन्मनः साफल्यं भगवतः साक्षात्कारम्; अवाप्स्यसि = लप्स्यसे;

**श्लोकभावः** - 'अर्जुन! भगवतः साक्षात्कारं सम्पादयितुम् उपासकानां (साधकानां) बहवः उपायाः सन्ति। साधकजनः सततम् उद्यमनशीलः। कुत्रचित् विफले जाते प्रयत्नान्तरं प्रति उद्युक्तो भवति। तत्र अनन्यया भक्त्या मनसः भगवति आधानम् अन्यतमः मार्गः। तत्र असमर्थः दृढसङ्कल्पस्सन् श्रद्धापूर्वकं पुनः पुनः प्रयत्नशीलवान् भवेत्। एवम् अभ्यासमाध्यमेन भगवतः सायुज्यम् आप्तुं शक्यते। अयमपि अन्यतमः

मार्गः। तत्रापि असमर्थवताम् उपासकानां भगवदर्थं कर्म करणरूपम् उपायान्तरमप्यस्ति। भगवदर्थं कर्म करणम् ; उपासकः स्वीयं जन्म,आत्मोद्धरणाय कञ्चन अवकाशं भावयेत्। स्वीयं जन्म पावनं कुर्यात्। जन्म दिव्यं सम्पादयेत्। जन्मनः लक्ष्यं च निर्दिशेत्। तत्साधनाय परमेश्वरं च शरणं यायात्। स्वार्थं परित्यजेत्। फलम् अनपेक्ष्य श्रद्धया कर्म आचरेत्। प्रेम्णा कर्म अनुतिष्ठेत्। महापुरुषाणां महासाध्वीनां च जीवन चरितं पठेत्, पाठयेच्च। काये, वाचि, मनसि च शुद्ध्या = त्रिकरणशुद्ध्या भगवत्प्रीत्यै यज्ञयागादिकं तपोदानादिकं च कुर्यात्। इदम् एव भगवदर्थं कर्म करणम् इत्युच्यते।

एवं भगवदर्थं कर्म कुर्वन्नपि भगवतः साक्षात्काररूपं वा भगवतः सायुज्यरूपं वा सिद्धिं प्राप्नेत्येव ' इति भगवान् श्रीकृष्णः भगवदर्थं कर्मकरणं प्रति अर्जुनम् अवगाहनापरं करोति।

**व्याकरमांशाः** -अभ्यासेऽपि; अभ्यासे + अपि (ए + अ =एऽ) पूर्वरूपसन्धिः।
असमर्थोऽसि;असमर्थः + असि(ओ + अ =ओऽ) पूर्वरूपसन्धिः।

**स्वावलोकनप्रश्नाः**

१.'मत्कर्मपरमो भव ' अत्र 'मत्कर्मपरमः' पदस्य अर्थः कः ?

२.'कुर्वन् सिद्धिम् अवाप्स्यसि' अत्र ' सिद्धिम्' पदस्य अर्थः कः ?

**३.२.४ कर्मफलत्यागात्मकस्य उपायान्तरस्यापि संसूचनम्**

**अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।**
**सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ।। ११ ।।**

**श्लोकपरिचयः**-अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषय परतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः :-**सगुणोपासनमपि वरम्, कर्मणः फलस्य भगवतः समर्पणम् अपि सगुणोपासनपद्धतिषु अन्यतमः मार्गः इति श्रीकृष्णः अर्जुनं प्रबोधयति इत्यस्मिन् सन्दर्भे अयं श्लोकः वर्तते।

**पदविभागः** :- अथ, एतत्,अपि, अशक्तः, असि, कर्तुम्, मद्योगम्, आश्रितः। सर्वकर्मफलत्यागम्, ततः, कुरु, यतात्मवान्।।

**अन्वयक्रमः** :- (धनञ्जय) अथ, मद्योगम्, आश्रितः, एतत् कर्तुम्, अपि, अशक्तः असि, ततः, यतात्मवान्, सर्वफलत्यागम्, कुरु।

**प्रतिपदार्थः -**(धनञ्जय = अर्जुन !;)अथ = यदि; मद्योगम्,मत् = भगवतः मम कर्मसु ;योगम् = तत्परताविधानम्; आश्रितः = स्वीकृतः सन्; एतत् = उपासनम्; कर्तुम् = आचरितुम् ; अपि = च ; अशक्तः = असमर्थः; असि = भवसि;ततः = तर्हि; यतात्मवान् = साधने प्रयत्नशीलः सन्; सर्वकर्मफलत्यागम् , सर्व = (त्वदाचरितानाम्) समस्तानाम् ; कर्म = कार्याणाम्; फल = फलितस्य ; त्यागम् = समर्पणम् ; कुरु = विधेहि ;

**श्लोकभावः**- 'अर्जुन! भगवतः साक्षात्कारं सम्पादयितुम् उपासकानां (साधकानां) बहवः उपायाः सन्ति। तत्र अनन्यया भक्त्या मनसः भगवति आधानम् एकः मार्गः। अभ्यासमाध्यमेन भगवतः सायुज्यसम्पादनं द्वितीयः मार्गः। भगवदर्थं कर्म करणं तृतीयः मार्गः। अत्रापि च विफलस्य सर्वकर्मफलत्यागात्मकः कश्चित् मार्गः अस्ति। स च चतुर्थः। तथाहि- उपासकः भगवति विश्वासपूर्णः भवेत्। भगवच्चिन्तनशीलः भवेत्। इन्द्रियाणां नियन्त्रणे, मनसः निर्ग्रहणे ,बुद्धेः विवेचनाधिरोहणे निरन्तरं प्रयत्नशीली स्यात्। यत् कृतम्, यत् अशितम्, यत् जुष्टम्,यत् दत्तम् ,यत् तप्तं तत् तत् सर्वं (मत्) भगवदर्पणं कुर्यात्। भक्त्या समर्पितं पत्रं वा,पुष्पं वा अन्ततः तोयमपि वा भवतु भगवान् प्रेम्णा अश्नातिउस्वीकरोति। एवं भगवतः प्रीतिं जनयन्, तत्परतया आचरितस्य कर्मणः सर्वस्य श्रद्धया भगवतः समर्पणमेव सर्वकर्मफलत्यागः भवति। एतादृशकर्मफलत्यागः अपि भगवतः साक्षात्काराय कल्पते 'इत्येवं ,भगवान् श्रीकृष्णः कर्मफलत्यागरूपम् उपायान्तरं प्रत्यपि अर्जुनम् अवगाहनापरं करोति।

**व्याकरणांशाः** -अथैतत् ; अथ + एतत्(अ + ए = ऐ) वृद्धसन्धिः।

अप्यशक्तः ; अपि + अशक्तः (इ + अ = य्) यणादेशसन्धिः।

अशक्तोऽसि ; अशक्तः + असि (अः + अ = ओऽ) पूर्वरूपसन्धिः।

**स्वावलोकनप्रश्नाः**

१. सगुणोपासनाय कति मार्गाः संसूचिताः? ते के ?

२. सगुणोपासनाय सूचितेषु मार्गेषु चतुर्थः कः ?

### ३.२.५ कर्मफलत्यागस्य प्राशस्त्यम्

**श्रोयो हि ज्ञानम् अभ्यासात्, ज्ञानात् ध्यानं विशिष्यते ।**
**ध्यानात् कर्मफलत्यागः, त्यागात् शान्तिरनन्तरम् ।। १२ ।।**

**श्लोकपरिचयः** :- अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषय परतया भक्तियोगः इति व्यवहारःवर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यास एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः :-**कर्मफलत्यागश्च सगुणोपासनपद्धतिषु अन्यतमः। स च श्रेयोदायकः महत्त्वपूर्णश्च इति श्रीकृष्णः कर्मफलत्यागस्य फलम् ज्ञापयति इत्यस्मिन् सन्दर्भे अयं श्लोकः वर्तते।

**पदविभागः** :- श्रेयः हि, ज्ञानम्, अभ्यासात्, ज्ञानात्, ध्यानम्, विशिष्यते। ध्यानात्, कर्मफलत्यागः, त्यागात्, शान्तिः, अनन्तरम्।।

**अन्वयक्रमः** :- (धनञ्जय ) अभ्यासात्, ज्ञानम्, श्रेयः, ज्ञानात्, ध्यानम्, विशिष्यते, ध्यानात्, कर्मफलत्यागः,(श्रेयः) त्यागात्, अनन्तरम्, शान्तिः, हि,(लभ्यते)।

**प्रतिपदार्थः** :-(धनञ्जय = अर्जुन !); अभ्यासात् = पुनः पुनः प्रयत्नकरणात् ; ज्ञानम् = विषयस्य समाचारात्मकं ज्ञानम्; श्रेयः = श्रेयस्करं भवति।; ज्ञानात् = समाचारात्मकज्ञानात् ; ध्यानम् = अवगमनरूपम् आलोचनात्मकं ध्यानम्; विशिष्यते = विशिष्य गुणसम्पन्नं भवति ; ध्यानात् = अवगमनरूपात् ध्यानात् ; कर्मफलत्यागः,कर्म = आचरितस्य कार्यस्य; फल= फलितस्य; त्यागः = समर्पणम् ; श्रेयस्करः =

श्रेयोदायकः भवति ;हि = यस्मात् कारणात्; त्यागात् = समर्पणभावात् ; अनन्तरम् = अनुपदमेव ; शान्तिः = विषयोपशमः (प्रशान्तमनस्कता); (लभ्यते = प्राप्यते )

**श्लोकभावः** - धनञ्जय ! अभ्यासः > ज्ञानम् > ध्यानम् > कर्मफलत्यागः एते उत्तरोत्तरं श्रेष्ठाः। अभ्यासः नाम पुनः पुनः प्रयत्नकरणम्। पुनः पुनः करणे आलोचनायाः आवश्यकता न विद्यते। अतः आलोचनायाः आवश्यकतां विना यान्त्रिकतया पुनः पुनः करणापेक्षया अवगम-नात्मकं ज्ञानं श्रेष्ठतरं भवति। परं ज्ञाने अपि अभिप्रेरणा न भवति। अभिप्रेरणाहीनज्ञानापेक्षया संस्कारसम्पादकं ध्यानं श्रेयस्करं भवति। तत्रापि निस्सङ्गता नैव सम्पाद्यते। अतः तदपेक्षया अपि निस्सङ्गत्व - निर्ममत्व - निरहङ्कारत्वानाम् अभ्यासकः कर्मफलत्यागः श्रेष्ठतमः भवति।

**व्याकरणांशाः** -श्रोयो हि ; श्रोयः + हि (अः अह् = ओ) स्वादिसन्धिः।
त्यागाच्छान्तिः; त्यागात् + शान्तिः (त् + श् = छ्) छत्वसन्धिः।
विद्युच्छक्तिः; विद्युत् + शक्तिः (त् + श् = छ्) छत्वसन्धिः

**स्वावलोकनप्रश्नाः**

१. अभ्यासात् श्रेयः किम् ?

२. ध्यानं कस्मात् विशिष्यते ?

३. ध्यानात् कर्मफलत्यागः किमर्थं श्रेयस्करः ?

## ३.३.उपसंहारः

एवम् अत्र सगुण-साकारोपासकस्यापि निर्गुण-निराकारोपासनस्थित्यभ्यसनाय ,भगवति मनसः बुद्धेश्च स्थापनम्, अभ्यास मार्गानुसरणम्, भगवद्विषयककर्माचरणम्, कर्मफलस्य भगवदर्पणम् इत्येते मार्गाः सूचिताः।

## ३.४.अभ्यासः

श्लोकद्वयं व्याख्यात?

अ) श्रेयो हि ज्ञानम् अभ्यासात्, ज्ञानात् ध्यानं विशिष्यते ।
ध्यानात् कर्मफलत्यागः, त्यागात् शान्तिरनन्तरम् ।।

इ) अथ चित्तं समाधातुम्, न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ।।

# UNIT- IV
# सः मे प्रियः

**संरचना**

४.०. परिचयः
४.१. लक्ष्याणि
४.२. मानवाभ्युदयकराणां सद्गुणानां वर्णनम्
४.२.१. सः - मे प्रियः -१
४.२.२. सः - मे प्रियः - २
४.२.३. सः - मे प्रियः - ३
४.२.४. सः - मे प्रियः - ४
४.२.५. सः - मे प्रियः - ५
४.२.६. सः - मे प्रियः - ६
४.३.उपसंहारः
४.४.अभ्यासः

## ४.०.परिचयः

मानवाभ्युदयकराणां सद्गुणानां वर्णनम् इत्ययं पाठ्यांशः श्रीमद्भगवद्गीतायाः द्वादशोऽध्याये त्रयोदशतमश्लोकतः आरभ्य विंशतितमश्लोकपर्यन्तं अष्टसु श्लोकेषु प्रवृत्तः। अत्र च भगवान् सः मे प्रियः इत्युक्त्या मानवस्य परिहरणीयान् विषयान् , अभ्यसनीयत्वेन अपेक्षितान् च मानवस्य अभ्युदयमभिकांक्ष्य प्रोक्तवान्। द्वेषो मा भवतु , ममता मा भवतु। अहङ्कारः नैव उपसर्पणीयः। कार्यकारी भवतु। कारुणिकता भवतु , प्रेमास्पदो भवतु। लोकं प्रति उद्वेगः नैव प्रदर्शनीयः। सर्वावस्थासु समानमनस्कता आरोग्याय अपेक्षिता। इत्येवमादयः कण्ठरवेण उक्ताः। मानवाभ्युदयकारी पुरुषः भगवतः अत्यन्तं प्रियः भवति इति च प्रतिपादितम्।

## ४.१.लक्ष्याणि

मानवः विवेकयुतः। सः विवेकबुद्ध्या समयं वा शक्तिं वृथा न करोति। सः जन्मनः अत्यन्तं यत् उद्दिष्टं तत्कार्यसम्पादने एव रतः भवति। अत्यन्तं जीवनलक्ष्यं

साधयति। जीवनसाफल्यं प्राप्नोति। एतत् साधनाय मानवस्य निबद्धता आवश्यकी। क्रमशिक्षणमावश्यकम्। शारीरकं मानसिकं स्वास्थ्यम् अपेक्षितम्। परिपक्वबुद्धिः, विशालभवनाश्च अपेक्षिताः। वस्तुतः एते मनवस्य अभ्युदयकारकाः विषयाः। भगवतः मुखात् बहुधा एतेषां प्रस्तावनम् अत्र सम्पन्नम्। अयमेव अंशः अस्य पाठ्यांशस्य प्रधानतया उद्दिष्टः । एतत्पाठ्यांशस्य अध्ययनेन-

- मानवस्य प्रशान्ततासम्पादकान् विषयान् अवगन्तुं प्रभवति।
- मानवस्य दुःखदायकान् विषयान् पठितुं पारयति।
- आत्मोद्धरणाय अवरोधकान् द्वन्द्वविषयान् लिखितुं समर्थो भवति।
- भगवतः अभीष्टं तत्त्वं आधिकृत्य भाषितुं शक्नोति।

## ४.२. मानवाभ्युदयकराणां सद्गुणानां वर्णनम्

### ४.२.१.सः - मे प्रियः -१

**अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।**
**निर्ममो निरहंकारः समदुःखसुखः क्षमी ।। १३ ।।**

**सन्तुष्टस्सततं योगी यतात्मा दृढनिश्चयः ।**
**मय्यर्पितमनोबुद्धिः यो मद्भक्तस्स मे प्रियः ।। १४ ।।**

**श्लोकपरिचयः :-** अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषयपरतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः :-**सगुणोपासनद्वारा भगवत्साक्षात्काराय स्थितान् उपायान् सन्दिश्य, श्रीकृष्णः, भगवत्साक्षात्कारम् प्राप्तवताम् उपासकानाम् स्वरूपं स्वभावं च अर्जुनाय प्रबोधयति इत्यस्मिन् सन्दर्भे अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये भक्तियोगे वर्तते।

**पदविभागः -** अद्वेष्टा, सर्वभूतानाम्, मैत्रः, करुणः, एव, च। निर्ममः, निरहंकारः, समदुःखसुखः, क्षमी। सन्तुष्टः, सततम्, योगी, यतात्मा, दृढनिश्चयः। मयि, अर्पितमनोबुद्धिः, यः, मद्भक्तः, सः, मे, प्रियः।।

**अन्वयक्रमः -** यः, सर्वभूतानाम्, अद्वेष्टा, मैत्रः, करुणः, एव, निर्ममः, निरहंकारः, समदुःख-सुखः, क्षमी, योगी, सततम् सन्तुष्टः, यतात्मा, दृढनिश्चयः, मयि, अर्पितिमनोबुद्धिः, सः, मद्भक्तः, मे, प्रियः।

**प्रतिपदार्थः -** यः = उपासकः यः; सर्वभूतानाम्, सर्व = समस्तानाम् ; भूतानाम् = प्राणिनाम्; अद्वेष्टा = अद्वेषकः ; मैत्रः = (प्राणिषु) स्नेहशीलः ; च = अपि च ; करुणः = दयावान् ; एवम् = एवम् एव; निर्ममः = ममत्वभावनारहितः ; निरहंकारः = अहङ्कारशून्यः; समदुःखसुखः = सुखदुःखयोः समत्वभावनः; क्षमी = सहनशीलः; योगी = राजयोगसम्पन्न; सततम् = निरन्तरम् ; सन्तुष्टः = सन्तोषशीलः ; यतात्मा = आत्मोद्धरणे उद्यमनस्वभावः ;दृढनिश्चयः, दृढ = निश्चल ; निश्चयः = सङ्कल्पः ; मयि = भगवति श्रीकृष्णे ; अर्पितमनोबुद्धिः, अर्पित = भगवत्समर्पित ; मन = चित्त ; बुद्धिः = धीमान् ; सः = तादृशः; मद्भक्तः, मत् = मम; भक्तः = उपासकः; मे = श्रीकृष्णस्य मम ; प्रियः = प्रकामम् इष्टः।

**श्लोकभावः -** "अर्जुन ! कर्मफलत्यागः प्रशस्तः। कर्मफलत्यागः देहिनां शान्तिं प्रयच्छति। शान्तिं च प्राप्य देही प्राणिषु सर्वेषु द्वेषं विजहाति। भूतेषु दयां कुरुते। जीविषु स्नेहशीली भवति। स्वार्थरहितः भवति। अहंकारशून्यः सम्पद्यते। सुखेषु स्पृहां विजहाति। दुःखेषु च अनुद्विग्नः भवति। अर्थात् सुखेषु दुःखेषु च समस्थितिसम्पन्नः जायते। सहनशीली भवति। नाम स्वयं कष्टं सहते। परेषाम् अभिप्रायं सहते। परेषाम् अपराधं च क्षमते। लाभं नष्टं च सन्तोषेण स्वीकरोति। सदा ध्यानयोगयुक्तः भवति। परिशीलनपरो जायते। मनः इन्द्रियाणि च वशीकृत्य शरीरं नियच्छति। स्थिरसङ्कल्पो भवति। सततं भगवत्येव मनः निवेशयतिः। विवेकबुद्धया कर्माणि सर्वाणि आचरति। एतादृशः शान्तिवर्धितसंस्कारसम्पन्नः पुरुषः मम अतीव प्रियः "इति भगवान् श्राकृष्णः उपासकं प्रति स्वस्य प्रीतिम् अर्जुनाय निवेदयति।

**व्याकरणांशाः :-** यतात्मा ; यत + आत्मा (अ + आ = आ) सवर्णदीर्घसन्धिः।
मय्यर्पित ; मयि + अर्पित (इ + अ = य्) यणादेशसन्धिः।

**स्वावलोकनप्रश्नाः**

१. यतात्मा नाम कः ?

२. दृढनिश्चयः इत्यस्य अर्थः कः ?

३. मैत्रः इति पदं कमर्थं सूचयति?

### ४.२.२.सः - मे प्रियः -२

**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।**
**हर्षामर्षभयोद्वेगैः मुक्तो यः स च मे प्रियः ।। १५ ।।**

**श्लोकपरिचयः-** अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषयपरतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः-** सगुणोपासनमार्गे भगवत्साक्षात्काराय स्थितान् उपायान् सन्दिश्य, श्रीकृष्णः, भगवत्साक्षात्कारम् प्राप्तवतः उपासकस्य हर्षामर्षभयोद्वेगाः न भवन्ति इति अर्जुनाय प्रबोधयति इत्यस्मिन् सन्दर्भे अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये भक्तियोगे वर्तते।

**पदविभागः -** यस्मात्, न, उद्विजते, लोकः, लोकात्, न, उद्विजते, च, यः। हर्ष-अमर्ष-भय-उद्वेगैः, मुक्तः, यः, सः, च, मे, प्रियः।।

**अन्वयक्रमः -** यस्मात्,लोकः,न ,उद्विजते,च,यः,लोकात्,न उद्विजते,च,यः,हर्ष-अमर्ष-भय-उद्वेगैः,मुक्तः,सः,मे, प्रियः।

**प्रतिपदार्थः-** यस्मात् = यस्मात् उपासकात् ; लोकः = जनः ; न उद्विजते = उद्विग्नतां न प्राप्नोति ; च = किञ्च; यः = उपासकः; लोकात् = वर्तमानप्रपञ्चात् ; न उद्विजते = असह्यतां न प्राप्नोति; च = अपि च ; यः = साधनशीलः उपासकः ; हर्ष - अमर्ष - भय - उद्वेगैः,हर्ष = सन्तोष ; अमर्ष = क्रोध ; भय = भीति ; उद्वेगैः = आवेगैः; मुक्तः = विसृष्टः ; सः = तादृशः उपासकः ; मे = मम भगवतः श्रीकृष्णस्य ; प्रियः = प्रकामम् इष्टः ।

**श्लोकभावः** - "अर्जुन ! कर्मफलत्यागः देहिनां शान्तिं प्रयच्छति। एवं शान्तिशोभितमनस्कः पुरुषः सर्वत्र वीतरागः प्रवर्तते। तस्य च कामक्रोधादिकं नैव भवति। अयं लोकं कमपि दृष्ट्वा नैव उद्विग्नः भवति । मनसः विकाराय आस्पदो नैव भवति। लोकस्य यत्किञ्चिदवस्थां प्रत्यपि उद्रेकपूरितो न भवति। लोकः अपि शान्तशोभितजनम् न उद्रिक्तं करोति। तस्य बाधां नैव जनयति। सदा पूजितं करोति। अपि च तस्य सन्तोषः न भवति। नाम सः सन्तोषं न अनुभवति। कोपमपि नैव भजते। भयं न प्राप्नोति। बलहीनमनस्को न भवति। सर्वस्यापि परिखिन्नः अपि नैव भवति। एवं शान्तोपशमितोद्रेकः पुरुषः मम प्रकामं प्रियः"इति भगवान् श्राकृष्णः उपासकं प्रति स्वस्य प्रीतिम् अर्जुनाय निवेदयति।

**व्याकरणांशाः-** हर्षामर्ष...; हर्ष + अमर्ष... (अ + अ = आ) सवर्णदीर्घसन्धिः।
...भयोद्वेगैः ; भय + उद्वेगैः (अ + उ = ओ) गुणसन्धिः।

**स्वावलोकनप्रश्नाः**

१. कैः मुक्तः उपासकः श्रीकृष्णस्य प्रियः?

२. 'यस्मात् न उद्विजते लोकः' इत्यस्य अर्थः कः ?

**४.२.३.सः - मे प्रियः -३**

**अनपेक्षः शुचिर्दक्षः उदासीनो गतव्यथः ।**
**सर्वारम्भपरित्यागी यो मद्भक्तस्स मे प्रियः ।। १६ ।।**

**श्लोकपरिचयः :-** अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषयपरतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः :-** सगुणोपासनमार्गे भगवत्साक्षात्काराय स्थितान् उपायान् सन्दिश्य, श्रीकृष्णः, भगवत्साक्षात्कारम् प्राप्तवतः उपासकस्य प्रत्येकलक्षणानि अर्जुनाय प्रबोधयति इत्यस्मिन् सन्दर्भे अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये भक्तियोगे वर्तते।

**पदविभागः** :- अनपेक्षः, शुचिः, दक्षः, उदासीनः,गतव्यथः। सर्वारम्भपरित्यागी, यः, मद्भक्तः, सः, मे, प्रियः।।

**अन्वयक्रमः :-** यः, अनपेक्षः, शुचिः, दक्षः, उदासीनः, गतव्यथः, सः, सर्वारम्भपरित्यागी, मद्भक्तः, मे, प्रियः।

**प्रतिपदार्थः -**यः = उपासकः; अनपेक्षः = काङ्क्षारहितः; शुचिः = त्रिकरणशुद्धः, पवित्रः; दक्षः = समर्थवान् ; उदासीनः = पक्षपातरहितः ; गतव्यथः = दुःखमुक्तः ; सः = तादृशः; सर्वारम्भपरित्यागी, सर्व = समस्तानाम् ; आरम्भ = प्रयत्नानाम् परित्यागी = कर्तृत्वाभिमान विसर्जकः ; मद्भक्तः,मत् = मम ; भक्तः = उपासकः मे = मम भगवतः श्रीकृष्णस्य ; प्रियः = प्रकामम् इष्टः;

**श्लोकभावः** -"अर्जुन! कर्मफलत्यागः देहिनां शान्तिं प्रयच्छति। एवं शान्तिसम्पदितसत्ववान् साधकः पुरुषः सर्वत्र आकाङ्क्षारहितः प्रवर्तते। विषयेषु सत्यतापूर्वक व्यवहरणम्,देहादिषु समुचिताहारपानीयादिस्वीकरणम्,च बाह्यशुद्धिः भवति। राग,द्वेष, कपटादिविकाराणां नाशनानन्तरं मनः स्वच्छं जायते। इयं च बाह्यशुद्धिः भवति। एवं बाह्याभ्यन्तरेषु पवित्रः सम्पद्यते। अयं च जन्मनः साफल्यापादकस्य कार्यकरणे समर्थः भवति। पक्षपातरहितः कार्येषु प्रवर्तते। कष्टेषु नैव व्यथाम् आप्नोति। मनो-वाक्-काय कर्मसु जन्मान्तरवशात् सम्पन्नस्य प्रारब्धस्य अनुभवद्वारा

परिहरणे दुरभिमानी न भवति। एतादृशः मदर्पितकर्मफलः साधकः पुरुषः मम अतीव प्रियः”इति भगवान् श्राकृष्णः उपासकं प्रति स्वस्य प्रीतिम् अर्जुनाय निवेदयति।

व्याकरणांशाः :- सर्वारम्भ..; सर्व + आरम्भ... (अ + आ = आ) सवर्णदीर्घसन्धिः।

...शुचिर्दक्षः ; शुचिः + दक्षः (इः + द् = र्) विसर्गसन्धिः।

**स्वावलोकनप्रश्नाः**

१.' शुचिः' इत्यस्य अर्थः कः ?

२. ' सर्वारम्भपरित्यागी ' इति पदं कम् अर्थं सूचयति ?

**४.२.४.सः - मे प्रियः -४**

**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।**
**शुभाशुभपरित्यागी भक्तिमान् यस्स मे प्रियः ।। १७ ।।**

**श्लोकपरिचयः** :– अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषयपरतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः :-** भगवत्साक्षात्काराय स्थितान् उपायान् सन्दिश्य, श्रीकृष्णः, भगवत्साक्षात्कारम् प्राप्तवतः उपासकस्य प्रत्येकलक्षणानि अर्जुनाय प्रबोधयति इत्यस्मिन् सन्दर्भे अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये भक्तियोगे वर्तते।

**पदविभागः** :- यः, न, हृष्यति, न, द्वेष्टि, न, शोचति, न, काङ्क्षति। शुभा-अशुभपरित्यागी, भक्तिमान्,यः, सः, मे, प्रियः।।

**अन्वयक्रमः :-** यः, न हृष्यति, न द्वेष्टि, न शोचति, न काङ्क्षति,(च) यः, शुभा-अशुभपरित्यागी, सः, भक्तिमान्, मे, प्रियः।

**प्रतिपदार्थः** :- यः = उपासकः यः; न हृष्यति = न हर्षम् आप्नोति ; न द्वेष्टि = इतरान् न दूषयति ; न शोचति = न शोकम् आप्नोति ; न काङ्क्षति = यत्किमपि न अभिलषते ;(च = किञ्च;) यः = उपासकः यः जनः; शुभाशुभपरित्यागी, शुभ = मङ्गल (सुखसन्तोषादीनाम्); अशुभ = अमङ्गलविषयक (दुःखशोकादीनाम्); परित्यागी = अवगाहनातीतः; सः = तादृशः; भक्तिमान् = उपासकः जनः ; मे = मम भगवतः श्रीकृष्णस्य; प्रियः = प्रकामम् इष्टः;

**श्लोकभावः-** 'अर्जुन ! भगवत्साक्षात्कारं प्राप्तः उपासकः पुरुषः विलक्षणः = विशेषगुणयुक्तः भवति। सः स्वजीवन विधानं प्रति,सामाजिकजीवनविधानं प्रति,सत्यपूर्णं प्रवर्तते। तस्य प्रवृत्तिः गंभीरा भवति। अतः कदापि सन्तोषं वा सुखं वा प्राप्तुं न इच्छति। कदापि दीनः अपि न भवति। निरुत्साहं न लभते। कष्टं वा दुःखं वा शोकं वा न प्राप्नोति। तस्य कुत्रापि रागः न भवति। कस्मिंश्चिदपि द्वेषः अपि तस्य न जायते। कुत्रापि आसक्तिः न भवति। कमपि न आकाङ्क्षति। सर्वत्र अभिलाषप्रवृत्तिं त्यजति। एवं शुभरूपाणां सुखसन्तोषाणां, अशुभरूपाणां दुःखशोकानां अशुभरूपाणां दुःखशोकानां च दूरतः प्रवर्तते। एवं सुखसन्तोषाणां दुःखशोकानां च अतीतः दृढसत्वबलसम्पन्नः मम भृशं प्रीतिपात्रः भवति " इति भगवान् श्राकृष्णः उपासकं प्रति स्वस्य प्रीतिम् अर्जुनाय निवेदयति।

**व्याकरणांशाः** - यो न; यः + न (अः + न् = ओ) स्वादिसन्धिः।
शुभाशुभ...; शुभ + अशुभ... (अ + अ = आ) सवर्णदीर्घसन्धिः।

**स्वावलोकनप्रश्नाः**

१.' न द्वेष्टि ' इत्यस्य अर्थः कः ?

२. ' शुभ-अशुभपरित्यागी ' इति पदं कम् अर्थं सूचयति ?

**४.२.५.सः - मे प्रियः -५**

**समश्शत्रौ च मित्रे च तथा मानावमानयोः ।**
**शीतोष्णसुखदुःखेषु समस्सङ्गविवर्जितः ।।१८।।**

**तुल्यनिन्दास्तुस्तुतिर्मौनी संतुष्टो येन केनचित् ।**
**अनिकेतः स्थिरमतिः भक्तिमान् मे प्रियो नरः ।।१९।।**

**श्लोकपरिचयः** :- अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषयपरतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः** :- सगुणोपासनमार्गे भगवत्साक्षात्काराय स्थितान् उपायान् सन्दिश्य, श्रीकृष्णः, भगवत्साक्षात्कारम् प्राप्तवतः उपासकस्य प्रत्येकलक्षणानि अर्जुनाय प्रबोधयति इत्यस्मिन् सन्दर्भे अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये भक्तियोगे वर्तते।

**पदविभागः :-** समः, शत्रौ, च, मित्रे, च, तथा, मानावमानयोः। शीतोष्णसुखदुःखेषु ,समः, सङ्गविवर्जितः।। तुल्यनिन्दास्तुतिः, मौनी, सन्तुष्टः, येन, केनचित्। अनिकेतः, स्थिरमतिः, भक्तिमान्, मे, प्रियः, नरः।।

**अन्वयक्रमः :-** शत्रौ, मित्रे,च मानावमानयोः, समः, शीतोष्णसुखदुःखेषु, समः, च , सङ्गविवर्जितः, तुल्यनिन्दास्तुतिः, मौनी, येन केनचित्, सन्तुष्टः, अनिकेतः, स्थिरमतिः, भक्तिमान् नरः, मे, प्रियः।

**प्रतिपदार्थः** :- शत्रौ = अरौ,विरोधिनि; मित्रे = स्नेहिते, सुहृदि ; च = किञ्च ; मानावमानयोः, मान = पूजन ; अवमानयोः = पराभवयोः; समः = समानमनस्तत्त्ववान् ; शीतोष्णसुखदुःखेषु, शीत = शैत्य ; उष्ण = आतप ; सुख = सुखकाल ; दुःखेषु = दुःखकालेषु च ; समः = तरतमभावहीनः; च = अपि च ; सङ्गविवर्जितः, सङ्ग = साङ्गत्येन; विवर्जितः = परित्यक्तः; तुल्यनिन्दास्तुतिः = निन्दायां प्रशंसायां च समभावनः; मौनी = मितभाषी ,मौनशीली; येन केनचित् = यया कया च विधया ; सन्तुष्टः = सन्तोषशीलः; अनिकेतः = गृह- धन-कनक- वस्तु-वाहनेषु आसक्तिहीनः; स्थिरमतिः = दृढमनस्कः; भक्तिमान् = भक्तिसम्पन्नः; नरः

= जनः; मे = मम भगवतः श्रीकृष्णस्य; प्रियः = प्रकामम् इष्टः;

**श्लोकभावः** -"अर्जुन! भगवत्साक्षात्कारम् प्राप्तः उपासकः द्वन्द्वातीतः भवति। तथाहि-अयं समाधिमान् जायते। समाधिः नाम समः आधिः, समः = समानः,आधिः = मानसिकस्थितिः, आहत्य समाधिमान् इत्यस्य समानमानसिक स्थितिसम्पन्नः(AMAN OF BALANCED MENTAL STATUS) इत्यर्थः। अस्य शत्रुः न भवति। द्वेषं न करोति। प्रति कूलं न प्रवर्तते। तस्य मित्रम् अपि न भवति। रागं न करोति। अनुकूलं न प्रवर्तते। अर्थात् शत्रौ मित्रे समानप्रवर्तन शीलः भवति। तस्य पूजने, सम्माने च आदरो न भवति। सः पराभवे, तिरस्करणे च असह्यतां वा जुगुप्सां वा नैव गच्छति। नाम मानम् अवमानञ्च समानतया स्वीकरोति। शीतलभोगानां वा उष्णविलासानां वा वशो न भवति। शैत्यं सहते, उष्णं च सहते। असहनेन वा इच्छया वा शैत्यम् एव न अभिलषति। उष्णम् एव च न अभिलषति। धीरस्सन् शीतोष्णम् उभयम् समानं यथाप्राप्तम् अनुभवति। प्रशंसासु न उत्सहते। निन्दासु न अवचलति। निन्दां प्रशंसां च समानं स्वीकरोति। एवम् अयं द्वन्द्वविषयेषु पक्षपातरहितः सन् सङ्गहीनः प्रवर्तते।

अयं मौनं धृत्वा मननशीलः भवति। सदा आत्मविमर्शको जायते। कष्टं भवतु नष्टं भवतु, सुखं भवतु सन्तोषं भवतु येन केनापि भगवदनुगृहीतेन कष्टेन वा नष्टेन वा सुखेन वा सन्तोषेण वा तृप्त्या जीवति। एवम् अयं तृप्तिशीलः। आवासं प्रति आसक्तिः अपि अस्य न वर्तते। प्रति आवासं च अस्य आत्मीयतां जनयति । आवासे कुत्रापि स्वाम्यं (OWNER SHIP) नैव भजते। अयं सर्वदा निश्चयात्मिकां बुद्धिं धरति। कदापि चञ्चलबुद्धिं (CONFUSED MIND) न वहति । एतादृशः द्वन्द्वातीतः ,आत्मगुणैः सन्तृप्तिम् भजमानः उपासकः मम प्रकामम् अभिमतः" इति भगवान् श्रीकृष्णः उपासकं प्रति स्वस्य प्रीतिम् अर्जुनाय निवेदयति।

**व्याकरणांशाः** -समश्शत्रौ ; समः +शत्रौ (अः + श् इश्) विसर्गसन्धिः।

मानावमानयोः ; मान + अवमानयोः (अ + अ = आ) सवर्णदीर्घसन्धिः।

शीतोष्ण ; शीत + उष्ण (अ + उ = ओ) गुणसन्धिः।

प्रियो नरः ; प्रियः+ नरः (अः + न् = ओ) विसर्गसन्धिः।

**स्वावलोकनप्रश्नाः**

१.अत्र श्लोके कीर्तितान् द्वन्द्वपदार्थान् लिखत ?

२.'अनिकेतः' इत्यस्य अर्थः कः ?

**४.२.६.सः-मे प्रियः - ६**

**ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।**
**श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ।। २० ।।**

**श्लोकपरिचयः** :- अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये वर्तते। द्वादशाध्यायस्यैव विषयपरतया भक्तियोगः इति व्यवहारः वर्तते। अयं न स्वतन्त्रः ग्रन्थः,किन्तु श्रीमन्महाभारतान्तर्गत एव कश्चन भागः। अतः अस्यापि प्रणेता वेदव्यासः एव। प्रशान्तजीवनाय,क्रियाशीलात्मकजीवनाय च मानवानामावश्यकः मनस्तत्त्वशास्त्रविषयः अत्र वर्णितः।

**श्लोकसन्दर्भः -** सगुणोपासनमार्गे भगवत्साक्षात्काराय स्थितान् उपायान् सन्दिश्य, श्रीकृष्णः, भगवत्साक्षात्कारम् प्राप्तवतः उपासकस्य प्रत्येकलक्षणानि अर्जुनाय प्रबोधयति इत्यस्मिन् सन्दर्भे अयं श्लोकः श्रीमद्भगवद्गीतायाः द्वादशाध्याये भक्तियोगे वर्तते।

**पदविभागः :-** ये, तु, धर्म्यामृतम्,इदम्, यथोक्तम्, पर्युपासते। श्रद्धधानाः, मत्परमाः, भक्ताः, ते, अतीव, मे, प्रियाः।।

**अन्वयक्रमः :-** ये, तु, श्रद्धधानाः, मत्परमाः, यथोक्तम्, इदम्, धर्म्यामृतम्, पर्युपासते, ते
भक्ताः, मे, अतीव प्रियाः।

**प्रतिपदार्थः** - ये = ये उपासकजनाः ; तु = मात्रम् ; श्रद्धधानाः = श्रद्धावन्तः; मत्परमाः, मत् = श्रीकृष्णे भगवति मयि ;परमाः = तत्पराः भूत्वा ; यथोक्तम् = उक्तम् अनतिक्रम्य ; इदम् = एतत् पूर्वेक्तम्; धर्म्यामृतम् = धर्मबद्धम् उपदेशामृतम् ; पर्युपासते = सेवन्ते ;ते = तादृशाः; भक्ताः = भक्तजनाः ; मे = मम भगवतः श्रीकृष्णस्य; अतीव = प्रकामम्; प्रियाः = इष्टाः;।

**श्लोकभावः** :-‘अर्जुन ! मया उक्तं सर्वं धर्म्यम्। धर्मात् अनपेतम्। जन्मनःसफलतासाधनं हि धर्मः। तत्र सर्वैः प्रयत्नः कार्यः। सः श्रेयोमार्गः एव मया एतावत् उपदिष्टः। स च उपदेशात्मकः श्रेयोमार्गः जन्मनः अमृतत्वं अमरत्वं च सम्पादयति। अतः मया उपदिष्टः जन्मनः सफलतासाधकः श्रेयोमार्गं मानवैः अनुसर्तव्यः अस्ति। वेद, शास्त्र, गुरुजन,महात्मभिः उक्तिषु विश्वासपूर्णं प्रवर्तनमेव श्रद्धा भवति। ये च अनन्यभक्त्या माम् एव शरणं प्राप्य श्रद्धया उपदेशं यथोक्तं पर्युपासते तादृशाः भगवदुपासकाः मम अतीव प्रियाः भवन्ति ‘ इति भगवान् श्राकृष्णः उपासकं प्रति स्वस्य प्रीतिम् अर्जुनाय निवेदयति।

**व्याकरणांशाः** - धर्म्यामृतम् ; धर्म्य + अमृतम् (अ + अ = आ) सवर्णदीर्घसन्धिः।

यथोक्तम् ; यथा + उक्तम् (अ + उ = ओ) गुणसन्धिः।

पर्युपासते ; परि अ उपासते (इ + उ = य्) यणादेशसन्धिः।

**स्वावलोकनप्रश्नाः**

१’.ते अतीव मे प्रियाः ’ अत्र ’ते’ के ?

२.’ ये तु धर्म्यामृतम् इदम् ’ अत्र ’ इदम्’ पदं कं सम्बन्धयति ?

## ४.३.उपसंहारः

एवम् अत्र, भगवान् श्रीकृष्णः ’स मे युक्ततमो मतः’इत्यादिना मानवाभ्युदयकरान् विषयान् प्रस्तुतवान्। तत्र भौतिकांशाः सन्ति।,आध्यात्मिकाः अंशाः वर्तन्ते। दैविकाश्च विषयाः सन्ति। एते अंशाः निस्सन्देहं मनवानां श्रेयसे च कल्पन्ते।

## ४.४.अभ्यासः

अ) ’स मे युक्ततमो मतः’ इत्यादिना उक्ताः गुणाः कथं मानवाभ्युयकराः- विशदयत ?

# UNIT-V
# व्यसात्मकप्रश्नाः

**संरचना**

५.०. परिचयः
५.१. लक्ष्याणि
५.२. व्यसात्मकप्रश्नाः
५.२.१. उपासनम् - तद्गतद्वैविध्यम्
५.२.२. सगुणोपासनाय उपायानां कथनम्
५.२.३. मानवाभ्युदयकराणां सद्गुणानां वर्णनम्
५.३. उपसंहारः
५.४. अभ्यासः

## ५.०.परिचयः

Diploma in Sanskrit Examination मध्ये , आहत्य पञ्च पत्राणि सन्ति। तत्र इदं चतुर्थं प्रश्नपत्रम्। अस्य च शतं (१००)अङ्काः भवन्ति। अत्र च विषयचतुष्टयं भवति।तत्र श्रीमद्भगवद्गीत - द्वादशोध्यायः इत्ययम् अन्यतमः। एतस्य कृते चत्वारिंशत् (४०) अङ्काः भवन्ति। द्वौ प्रश्नौ वर्तेते। तेषु व्यासात्मकः प्रश्नः एकः। अत्र प्रश्न द्वयं समाधातव्यं भवति। एकैकस्य कृते दश अङ्काः। आहत्य व्यासात्मकप्रश्नानां कृते विंशति अङ्काः सन्ति।

## ५.१.लक्ष्याणि

प्रतिपाठ्यांशस्यापि अध्ययने विद्यार्थिनां प्रयोजनद्वयं साधनीयं भवति। तत्र वैयक्तिकं जीवनलक्ष्यम् एकम्। परीक्षादृक्पथम् (Examination Point Of View) अपरम्। प्रश्नपत्रस्य पाठ्यांशं परीक्षादृष्ट्या अपि अभ्यसनीयं भवति। प्रश्नपत्रे व्यासात्मकप्रश्नलेखनाय आवश्यकम् अत्र सम्पाद्यते। एतत् पाठ्यांशस्य अध्ययनेन -

- संस्कृतभाषायां लेखनकौशलं वर्धितं भवति।
- संस्कृतभाषायां रचनाकौशलं सम्पादितं भवति।

- संस्कृतभाषायाम्  आलोचनायै  प्रेरणं भवति।
- परीक्षादृक्पथं अभ्यसितं ,ज्ञानसमुपार्जनं च भवति।
- सम्पूर्णविषयस्य एकमखतः दर्शनं-अवगमनं च सम्पादितं भवति।

## ५.२.व्यसात्मकप्रश्नाः

### ५.२.१.उपासनम् - तद्गतद्वैविध्यम्

प्राणिषु मानवः श्रेष्ठतमः। सः बुद्धिजीवः, विवेकसम्पन्नश्च। सः स्वस्य विवेकबुद्ध्यैव इतरान् अतिशेते। साधनमार्गम् अनुतिष्ठति। आत्मानम् अवगच्छति। पुरुषार्थान् साधयति। आत्मानम् अवगत्य पुरुषार्थसाधनाय प्रयत्नमेव उपासनं भवति। तत्र च साधकगतयोग्यतानुसारेण उपासने अपि द्वैविध्यम् जातम्। यत्र आत्मा वा परब्रह्मा वा भगवान् वा आकारम्, गुणान् च अतीत्य सर्वव्यापकतया ध्यानयोग्यो भवति तत्र तत् उपासनं निराकारोपासनं भवति । यत्र आत्मा वा परब्रह्मा वा भगवान् वा आकारम्, गुणान् च आपाद्य अर्चनामूर्तिरूपेण परिमितिषु ध्यानयोग्यो भवति तत्र तत् उपासनं साकारोपासनं भवति । उभयोरप्युपासनयोः आत्मानः अवगमनं प्रति आलोचनागतव्यत्यासम् एव कारणम्। स च व्यत्यासः अत्र पाठ्यांशे बोधयते।

**सगुण - निर्गुणोपासनसम्बन्धिप्रश्नकरणम् :-**

इतः पूर्वम्  एकाशोध्यायः, विश्वरूपसन्दर्शनयोगः। एतावत्पर्यन्तं श्रीकृष्णः यथावकाशं सगुणोपासनं निर्गुणोपासनं च  च वर्णितवान्,विवृतवान् च। तत्र अर्जुनस्य जिज्ञासा जाता। तस्य  इमां जिज्ञासां "भगवन्! श्रीकृष्ण! भवद्भिः कुत्रचित् सगुणोपासनं समर्थितम्। अपरत्र कुत्रचित् निर्गुणोपासनं अभिवर्णितम्। केचित्   अनन्यप्रेम्णा भजनध्यानादिभिः परमेश्वरस्य तव  सगुणरूपं दृढविश्वासेन उपासन्ते। ते सगुणोपासकाः भवन्ति। अपरे केचित् सर्वव्यापकस्य अव्यक्तस्य परमेश्वरस्य तव निर्गुणरूपम् अर्चयन्ति। ते निर्गुणोपासकाः भवन्ति। एतौ द्वैवप्युपासकौ तत्र तत्र त्वत्समर्थितमार्गावेव  अनुसृतौ। तयोः श्रेष्ठतमः उपासकः कः ? 'इति अर्जुनः श्रीकृष्षाय निवेदयति।

**सगुणोपासकानां युक्ततमत्वम् :-**

एवम्   अर्जुनस्य प्रश्नं श्रुत्वा ,श्रीकृष्णः एवम्  "अर्जुन! त्वदुक्तरीत्या केचित् ,तेषां मनः बुद्धि च मयि निवेशयन्ति। तेषां वेदेषु,शास्त्रेषु, महतां वाक्येषु, च विश्वसनीयता अधिका। सैव  श्रद्धा भवति। श्रद्धया सततं भजनध्यानादिभिः माम् एव आराधयन्ति।

माम् एव शरणं यान्ति । तादृशाः सगुणोपासकाः भवन्ति। ते मम योगिष्वपि अत्युत्तमत्वेन अभिमताः " इति उत्तरं ददाति। अर्थात् सगुणोपासनं श्रेष्ठम्, सगुणोपासकः श्रेष्ठतमः अर्जुनस्य समाधनम् आगतम् इति भावनीयम् ।

**निर्गुण-निराकारोपासनम् :-**

प्रसङ्गवशात् अत्र च पद्ये भगवतः निर्गुण-निराकारब्रह्मणः स्वरूपम्, निराकारब्रह्मणः उपासनम्, निराकारब्रह्मणः उपासकानां प्राप्यं च अभिवर्णितम्। तथा हि-निर्गुणब्रह्मणः स्वरूपम्; अत्र च उपासनक्रमे भगवतः निर्दिष्टः आकारः न विद्यते। अत्र च भगवान् यत्किञ्चिदापादयितुम् अपि अशक्यः। एवम् अयम् आकार रहितः (निराकारः) गुणरहितश्च (निर्गणः) भवति। आकाश इव सर्वत्र व्यापनशीलः। किञ्च युक्त्या विचारणाय अयं बुद्धेः अगोचरः। वचसा स्वरूपं स्वभावं विधानं च निर्वक्तुम् च अशक्यः,अनिर्वचनीयः। सः यत्किमपि विकारं न सहते। सर्वदा एकात्मनैव विद्यते। अयं स्थिरः,नित्यः शाश्वतिकः,चलनरहितः,अव्यक्तरूपः, अव्यक्तस्वभावः, अव्यक्त विधानश्च। एवम् अयम् अव्यक्तश्च जातः। नाशरहितश्च इत्येवंनिर्गुणब्रह्मणः स्वरूपम् अभिवर्णितम्।

**निराकारब्रह्मणः उपासनम्:-**

इन्द्रियाणि इन्द्रियार्थविषयेभ्यः निवर्तयेत्। इन्द्रियाणि च वशं कुर्यात्। सर्वत्र समान बुद्धिं साधयेत् ।एकात्मकतादृष्टिः अभ्यसनीया भवेत्। मनश्च एकाग्रं कुर्यात्। तदा सच्चिदानन्दघनशीलिनं सर्वत्र भावयन् निराकारब्रह्माणम् उपासीत इत्येवं निर्गुणब्रह्मणः उपासनम् अभिवर्णितम्।

**निर्गुणब्रह्मणः उपासकस्य प्राप्यम् :-**

निर्गुणोपासकाश्च अपि सर्वत्र समानबुद्धिं सम्पादयन्ति खलु। तया बुद्ध्या सर्वेषु भूतेषु आत्मनः चैतन्यं अनुपश्यति।आत्मवत् सर्वभूतेषु प्रवर्तते। एवं सर्वेषां भूतानां हितैषी भवति। तथा तेषां हिते आसक्ताःसन्तः भगवतः साक्षात्कारम् अधिगच्छन्ति।भगवतः सायुज्यं प्राप्नुवन्ति इत्येवं निर्गुणब्रह्मणः उपासकस्य प्राप्यमपि अभिवर्णितम्।

**निर्गुणोपासने क्लेशाधिक्यस्य प्रतिपादनम् :-**

मानवाः देहधारिणः। जगति मानवाः देहसंरक्षणमेव सर्वस्वं मन्यन्ते। नाम देहः,देहगतानि इन्द्रियाणि, तदर्थविषयसङ्ग्रहणे एव देहधारिभिः मनसः बुद्धेश्च शक्तिः

उपयुज्यते। शरीरसुखमेव जीवनसुखं भावयन्ति। एवम् एते देहाभिमानिनः जाताः। निराकारोपासनक्रमे तावत् भगवान् अव्यक्तरूपः,सर्वव्यापी च। मनः संलग्नं कृत्वा इन्द्रियाणि वशीकृत्य निराकारब्रह्माणं (भगवन्तम्) उपासीत। ते एव अव्यक्ते ब्रह्मणि संसक्तचेतसः निराकारोपासकाः। तदुपासनापद्धत्यवगमनं च शरीरसुखेषु वीतरागिणामेव साध्यम्। मानवाश्च प्रकृत्या देहाभिमानिनः। एवं देहाभिमानिनां निराकारब्रह्मणः उपासनम् अधिकं क्लेशं जनयति। सामान्यतः निराकारस्य ब्रह्मणः उपासनापेक्षया साकारस्य ब्रह्मणः उपासनमेव श्रेष्ठतमं भवति इति भगवान् श्रीकृष्णः अर्जुनाय साकारोपासनस्य युक्ततमत्वं बोधयति।

**सगुणोपासनस्य प्राप्यं प्रयोजनं च :-**

'अर्जुन! आराधनाशीलः प्रथमम् उपासकः भवति । उपासकः तदेकमार्गेण भगवन्तं ध्यायति। भगवच्चिन्तनशीलश्च भवति। भगवच्चिन्तनशीलश्च सर्वोऽपि सदा किमपि कर्म करोत्येव। तानि सर्वाण्यपि कर्माणि तत्परो भूत्वा आचरेत् । आचरितानि च सर्वाण्यपि कर्माणि श्रीकृष्णे भगवति (मयि) संन्यसेत्। नाम फलम् अनपेक्ष्य, श्रद्धापुर्वकं कुर्वन् आचरितानि कर्माणि च भगवदर्पणं कुर्यात्। इमम् एव अनन्ययोगं कथयन्ति।

मृत्युः नाम मरणशीलः इत्यर्थः। संसारश्च सागरोपमः। यथा मकरतिमिङ्गिलादयः जलजन्तवः सागरे अवतीर्णम् उत्कृत्य मरणं प्रापयन्ति, तथा संसारे अवतीर्णं कामिनं रागिणं भोगिनं च जनं इर्द्रियाणि, मनः, विवेकहीनता इत्येवमादयः समुन्नतिम् अप्रापयित्वा समुचितपथः भ्रष्टं कुर्वन्ति। एवं संसारः सागरो भूत्वा जनान् मारयति । मृत्युसंसारसागरः नाम एष एव । मानवान् मरणशालिषु प्रवर्तयति। श्रेयसः मार्गे अवतरणायविलम्बहेतुः । अतः अयञ्च महान् प्रमादकरः।

ये च उपासकाः अनन्ययोगेन मनःपूर्वकं (माम्) भगवन्तम् सगुणं साकारम् उपासते , अचिरात् एव भगवान् (अहम्) कारुणिको भूत्वा अतिभयावहात् मृत्युसंसारसागरात् तेषाम् उपासकानां समुद्धारकः भवति' श्रीकृष्णः अर्जुनाय सगुणोपासनस्य प्राप्यं प्रयोजनं च प्रबोधयति।

**उपसंहारः :-**

एवम् अत्र सगुण-निर्गुणोपासनसम्बन्धिप्रश्नकरणम्,सगुणोपासकानां युक्ततमत्वम्, निर्गुण-निराकारोपासनम्, निर्गुणोपासने क्लेशाधिक्यस्य प्रतिपादनम्, सगुणोपासनस्य प्राप्यम् प्रयोजनम् च इत्येते विषयाः निरूपिपिताः।

**५.२.२.सगुणोपासनाय उपायानां कथनम् :-**

उपासकाः द्विविधाः। साकारोपासकाः निराकारोपासकाश्चेति। ते एव सगुणोपासकाः निर्गुणोपासकाश्च भवन्ति। वस्तुतः निराकारोपासकाः(निर्गुणोपासकाः) एते एव उत्तमाः उपासकाः। साकारोपासकाः(सगुणोपासकाः) ततः पश्चादेव। साकारोपासकानां निराकारोपासनपद्धत्याः अवगमनाय, अभ्यसनाय अनन्तरं तेषामपि निराकारोपासनाभ्युन्नतिप्राप्त्यै मनस्तत्त्वशास्त्रसम्बन्धिनः केचन उपायाः निर्दिष्टाः। तत्स्वरूपावगतये प्रवत्तः अयं पाठ्यांशः।

सगुणोपासकानाम् अपि युक्ततमत्वं यद्यपि विद्यते तथापि समुन्नतं , निर्गुणोपासनाम् आप्तुम् निबद्धतया प्रयत्नः कार्यः। तदर्थं च १) भगवति मनसः बुद्धेश्च स्थापनम्, २) अभ्यास मार्गानुसरणम्, ३) भगवद्विषयककर्माचरणम्, ४) कर्मफलस्य भगवदर्पणम् इत्येते मार्गाः सूचिताः। तन्मार्गस्य विधिविधानज्ञापनं एतत् व्यासस्य लक्ष्यम् अस्ति।

**सगुणोपासनाय प्रथमोपायवर्णनम् :-**

'अर्जुन! निर्गुणनिराकार-सगुणसाकारोपासनयोः सगुणसाकारोपासनम् एव श्रेष्ठतमम्। देहाभिमानिनां निर्गुणनिराकारविधानं कष्टसाध्यम्। सुलभं प्रयोजनसाधकं च सगुणसाकारोपासनम् आचरतु। तदर्थं च (मम) भगवतः उपासको भव। अनन्यया भक्त्या चित्तं (मयि) भगवति संलग्नं कर्तुं प्रयत्नं कुरु। भगवदेकमनस्को भव। बुद्धिं विवेकसम्पन्नं साधय। विवेकबुद्धिं च (मयि) भगवति संयोजय। बुद्धेः (मयि) भगवति संयोजनानन्तरं उपासकः (त्वम्) भगवतः सान्निध्यं लभसे। भगवति एव निवसिष्यसि। अस्मिन् च विषये कोऽपि सन्देहः नास्ति' इति भगवान् श्रीकृष्णः अर्जुनं सन्दिशति।

**सगुणोपासनाय उपायान्तरवर्णनम् :-**

'अर्जुन! भगवति मनसः स्थिरम् आधानं वा बुद्धेः निश्चलं निवेशनं वा कष्टतरम् एव। यदि भगवति मनसः स्थिरं आधानं कष्टम् , बुद्धेः निवेशनं च असाध्यं भाव्यते ,तदा अभ्यास (practice) माध्यमेन भगवन्तम् आप्तुं प्रयत्नं कुरु। पुनः पुनः

प्रयत्नकरणपद्धतेः एव अभ्यासयोग इति व्यवहारः। स च कर्मणि दृढमतिं वर्धयति। क्रियाशीलकतां जनयति। धियः जाड्यं हरति। कर्मणि संस्कारम् आदधाति। व्यवसायस्वभावम् , उद्यमनस्वभावं च अभ्यासयति। उद्योगिनम् उत्साहवन्तं करोति । उद्योगिनः निरुत्साहम् अपाकरोति। एवम् अभ्यासो हि कर्मणां कौशलम् आदधाति, ( Practice makes man perfect ) इत्यादीनि वचनानि अभ्यासप्रक्रियायाः कार्यसाधकत्वं ख्यापयन्ति च। कष्टपूरितम्,असाध्यत्वेन च भावितं सर्वम् अपि अभ्यासेन क्रमेण अधिगन्तुं शक्यते ' इति भगवान् श्रीकृष्णः अभ्यासयोगं प्रति अर्जुनाय अवगाहनां कल्पयति।

**सगुणोपासनाय इतोऽप्यन्यस्य उपायस्य सूचनम् :-**

'अर्जुन! भगवतः साक्षात्कारं सम्पादयितुम् उपासकानां (साधकानां) बहवः उपायाः सन्ति। साधकजनः सततम् उद्यमनशीलः। कुत्रचित् विफले जाते प्रयत्नान्तरं प्रति उद्युक्तो भवति। तत्र अनन्यया भक्त्या मनसः भगवति आधानम् अन्यतमः मार्गः। तत्र असमर्थः दृढसङ्कल्पस्सन् श्रद्धापूर्वकं पुनः पुनः प्रयत्नशीलवान् भवेत्। एवम् अभ्यासमाध्यमेन भगवतः सायुज्यम् आप्तुं शक्यते। अयमपि अन्यतमः मार्गः। तत्रापि असमर्थवताम् उपासकानां भगवदर्थं कर्म करणरूपम् उपायान्तरमप्यस्ति। भगवदर्थं कर्म करणम् ; उपासकः स्वीयं जन्म अवकाशं भावयेत्। स्वीयं जन्म पावनं कुर्यात्। जन्म दिव्यं सम्पादयेत्। जन्मनः लक्ष्यं च निर्दिशेत्। तत्साधनाय परमेश्वरं च शरणं यायात्। स्वार्थं परित्यजेत्। फलम् अनपेक्ष्य श्रद्धया कर्म आचरेत्। प्रेम्णा कर्म अनुतिष्ठेत्। महापुरुषाणां महासाध्वीनां च जीवनचरितं पठेत्, पाठयेच्च। काये, वाचि, मनसि च शुद्ध्या = त्रिकरणशुद्ध्याभगवत्प्रीत्यै यज्ञयागादिकं तपोदानादिकं च कुर्यात्। इदम् एव भगवदर्थं कर्म करणम् इत्युच्यते।

एवं भगवदर्थं कर्म कुर्वन्नपि भगवतः साक्षात्काररूपं वा भगवतः सायुज्यरूपं वा सिद्धिं प्राप्नेत्येव'इति भगवान् श्रीकृष्णः भगवदर्थं कर्म करणं प्रति अर्जुनम् अवगाहनापरं करोति।

**कर्मफलत्यागात्मकस्य उपायान्तरस्यापि संसूचनम् :-**

'अर्जुन! भगवतः साक्षात्कारं सम्पादयितुम् उपासकानां (साधकानां) बहवः उपायाः सन्ति। तत्र अनन्यया भक्त्या मनसः भगवति आधानम् एकः मार्गः। अभ्यासमाध्यमेन भगवतः सायुज्यसम्पादनं द्वितीयः मार्गः। भगवदर्थं कर्म करणं तृतीयः मार्गः। अत्रापि

च विफलस्य सर्वकर्मफलत्यागात्मकः कश्चित् मार्गः अस्ति। स च चतुर्थः। तथाहि- उपासकः भगवति विश्वासपूर्णः भवेत्। भगवच्चिन्तनशीलः भवेत्। इन्द्रियाणां नियन्त्रणे,मनसः निग्रहण ,बुद्धेः विवेचनाधिरोहणे निरन्तरं प्रयत्नशीली स्यात्। यत् कृतम्, यत् अशितम्, यत् जुष्टम्,यत् दत्तम्, यत् तप्तं तत् तत् सर्वं (मत्) भगवदर्पणं कुर्यात्। भक्त्या समर्पितं पत्रं वा,पुष्पं वा अन्ततः तोयमपि वा भवतु भगवान् प्रेम्णा अश्नाति = स्वीकरोति। एवं भगवतः प्रीतिं जनयन्, तत्परतया आचरितस्य कर्मणः सर्वस्य श्रद्धया भगवतः समर्पणमेव सर्वकर्मफलत्यागः भवति। एतादृशकर्मफलत्यागः अपि भगवतः साक्षात्काराय कल्पते 'इत्येवं , भगवदर्थं कर्म करणेऽप्यशक्तस्य कर्मफलत्यागरूपम् उपायान्तरं विद्यते इति भगवान् श्रीकृष्णः कर्मफलत्यागरूपम् उपायान्तरं प्रत्यपि अर्जुनम् अवगाहनापरं करोति।

**कर्मफलत्यागस्य प्राशस्त्यम् :-**

धनञ्जय! अभ्यासः > ज्ञानम् > ध्यानम् > कर्मफलत्यागः एते उत्तरोत्तरं श्रेष्ठाः। अभ्यासः नाम पुनः पुनः प्रयत्नकरणम्। पुनः पुनः करणे आलोचनायाः आवश्यकता न विद्यते। अतः आलोचनायाः आवश्यकतां विना यान्त्रिकतया पुनः पुनः करणापेक्षया पुनः पुनः करणे, एवम् अत्र सगुण-साकारोपासकस्यापि निर्गुण-निराकारोपासनस्थित्यभ्यसनाय ,भगवति मनसः बुद्धेश्च स्थापनम्, अभ्यास मार्गानुसरणम्, भगवद्विषयककर्माचरणम्, कर्मफलस्य भगवदर्पणम् इत्येते मार्गाः सूचिताः।

**५.२.३. मानवाभ्युदयकराणां सद्गुणानां वर्णनम् :-**

मानवः विवेकयुतः। सः विवेकबुद्ध्या समयं वा शक्तिं वृथा न करोति। सः जन्मनः अत्यन्तं यत् उद्दिष्टं तत्कार्यसम्पादने एव रतः भवति। अत्यन्तं जीवनलक्ष्यं साधयति। जीवनसाफल्यं प्राप्नोति। एतत् साधनाय मानवस्य निबद्धता आवश्यकी। क्रमशिक्षणमावश्यकम्। शारीरकं मानसिकं स्वास्थ्यम् अपेक्षितम्। परिपक्वबुद्धिः, विशालभवनाश्च अपेक्षिताः। वस्तुतः एते मानवस्य अभ्युदयकारकाः विषयाः। एतेषां प्रस्तावनं बहुशः भगवतः मुखात् अत्र सम्पन्नम्।

**सः - मे प्रियः-१**

"अर्जुन! कर्मफलत्यागः प्रशस्तः। कर्मफलत्यागः देहिनां शान्तिं प्रयच्छति। शान्तिं च प्राप्य देही प्राणिषु सर्वेषु द्वेषं विजहाति। भूतेषु दयां कुरुते। जीविषु

स्नेहशीली भवति। स्वार्थरहितः भवति। अहंकारशून्यः सम्पद्यते। सुखेषु स्पृहां विजहाति। दुःखेषु च अनुद्विग्नः भवति। अर्थात् सुखेषु दुःखेषु च समस्थितिसम्पन्नः जायते। सहनशीली भवति। नाम स्वयं कष्टं सहते। परेषाम् अभिप्रायं सहते। परेषाम् अपराधं च क्षमते। लाभं नष्टं च सन्तोषेण स्वीकरोति। सदा ध्यानयोगयुक्तः भवति। परिशीलनपरो जायते। मनः इन्द्रियाणि च वशीकृत्य शरीरं नियच्छति। स्थिरसङ्कल्पो भवति। सततं भगवत्येव मनः निवेशयतिः। विवेकबुद्धया कर्माणि सर्वाणि आचरति। एतादृशः शान्तिवर्धितसंस्कारसम्पन्नः पुरुषः मम अतीव प्रियः"इति भगवान् श्राकृष्णः उपासकं प्रति स्वस्य प्रीतिम् अर्जुनाय निवेदयति।

**सः - मे प्रियः -२**

"अर्जुन! कर्मफलत्यागः देहिनां शान्तिं प्रयच्छति। एवं शान्तिशोभितमनस्कः पुरुषः सर्वत्र वीतरागः प्रवर्तते। तस्य च कामक्रोधादिकं नैव भवति। अयं लोकं कमपि दृष्ट्वा नैव उद्विग्नः भवति । मनसः विकाराय आस्पदो नैव भवति। लोकस्य यत्किञ्चिदवस्थां प्रत्यपि उद्रेकपूरितो न भवति। लोकः अपि शान्तशोभितजनम् न उद्रिक्तं करोति। तस्य बाधां नैव जनयति। सदा पूजितं करोति। अपि च तस्य सन्तोषः न भवति। नाम सः सन्तोषं न अनुभवति। कोपमपि नैव भजते। भयं न प्राप्नोति। बलहीनमनस्को भूत्वा सर्वस्यापि परिखिन्नः नैव भवति। एवं शान्तोपशमितोद्रेकः पुरुषः मम प्रकामं प्रियः"इति भगवान् श्रीकृष्णः उपासकं प्रति स्वस्य प्रीतिम् अर्जुनाय निवेदयति।

**सः - मे प्रियः -३**

"अर्जुन! कर्मफलत्यागः देहिनां शान्तिं प्रयच्छति। एवं शान्तिसम्पदितसत्ववान् साधकः पुरुषः सर्वत्र आकाङ्क्षारहितः प्रवर्तते। विषयेषु सत्यतापूर्कव्यवहरणम्,देहादिषु समुचिताहार-पानीयादिस्वीकरणम्,च बाह्यशुद्धिः भवति। राग,द्वेष, कपटादिविकाराणां नाशनानन्तरं मनः स्वच्छं जायते। इयं च बाह्यशुद्धिः भवति। एवं बाह्याभ्यन्तरेषु पवित्रः सम्पद्यते। अयं च जन्मनः साफल्यापादकस्य कार्यकरणे समर्थः भवति। पक्षपातरहितः कार्येषु प्रवर्तते। कष्टेषु नैव व्यथाम् आप्नोति। मनो-वाक्-काय -कर्मसु प्रारब्धस्य परिहरणे अभिमानहीनः भवति। एतादृशः मदर्पितकर्मफलः साधकः पुरुषः मम अतीव प्रियः"इति भगवान् श्राकृष्णः उपासकं प्रति स्वस्य प्रीतिम् अर्जुनाय निवेदयति।

**सः - मे प्रियः -४**

"अर्जुन ! भगवत्साक्षात्कारम् प्राप्तः उपासकः पुरुषः विलक्षणः = विशेषगुणयुक्तः भवति। सः स्वजीवन विधानं प्रति,सामाजिकजीवनविधानं प्रति,सत्यपूर्णं प्रवर्तते। तस्य प्रवृत्तिः गभीरा भवति। अतः कदापि सन्तोषं वा सुखं वा प्राप्तुं न इच्छति। कदापि दीनः अपि न भवति। निरुत्साहं न लभते। कष्टं वा दुःखं वा शोकं वा न प्राप्नोति। तस्य कुत्रापि रागः न भवति। कस्मिंश्चिदपि द्वेषः अपि तस्य न जायते। कुत्रापि आसक्तिः न भवति। कमपि न आकाङ्क्षति। सर्वत्र अभिलाषप्रवृत्तिं त्यजति। एवं शुभरूपाणां सुखसन्तोषाणां,अशुभरूपाणां दुःखशोकानां अशुभरूपाणां दुःखशोकानां च दूरतः प्रवर्तते। एवं सुखसन्तोषाणां दुःखशोकानां च अतीतः दृढसत्वबलसम्पन्नः मम भृशं प्रीतिपात्रः भवति " इति भगवान् श्राकृष्णः उपासकं प्रति स्वस्य प्रीतिम् अर्जुनाय निवेदयति।

**सः - मे प्रियः -५**

"अर्जुन ! भगवत्साक्षात्कारम् प्राप्तः उपासकः द्वन्द्वातीतः भवति। तथाहि-अयं समाधिमान् जायते। समाधिः नाम समः आधिः, समः= समानः,आधिः = मानसिकस्थितिः, आहत्य समाधिमान् इत्यस्य समानमानसिक स्थितिसम्पन्नः( A MAN OF BALANCED MENTAL STATUS) इत्यर्थः। अस्य शत्रुः न भवति। द्वेषं न करोति। प्रति कूलं न प्रवर्तते। तस्य मित्रम् अपि न भवति। रागं न करोति। अनुकूलं न प्रवर्तते। अर्थात् शत्रौ मित्रे समानप्रवर्तना शीलः भवति। तस्य पूजने, सम्माने च आदरो न भवति। सः पराभवे, तिरस्करणे च असह्यतां वा जुगुप्सां वा नैव गच्छति।नाम मानम् अवमानञ्च समानतया स्वीकरोति। शीतल भोगानां वा उष्णविलासानां वा वशो न भवति। शैत्यं सहते, उष्णं च सहते। असहनेन वा इच्छया वा शैत्यम् एव न अभिलति। उष्णम् एव च न अभिलति। धीरस्सन् शीतोष्णम् उभयम् समानं यथाप्राप्तम् अनुभवति। प्रशंसासु न उत्सहते। निन्दासु न अवचलति। निन्दांप्रशंसां च समानं स्वीकरोति। एवम् अयं द्वन्द्वविषयेषु पक्षपातरहितः सन् सङ्गहीनः प्रवर्तते।

अयं मौनं धृत्वा मननशीलः भवति। सदा आत्मविमर्शको जायते। कष्टं भवतु नष्टं भवतु, सुखं भवतु सन्तोषं भवतु येन केनापि भगवदनुगृहीतेन कष्टेन वा नष्टेन वा सुखेन वा सन्तोषेण वा तृप्त्या जीवति। एवम् अयं तृप्तिशीलः। आवासं प्रति आसक्तिः अपि अस्य न वर्तते। प्रति आवासं च अस्य आत्मीयतां जनयति । आवासे

कुत्रापि स्वाम्यं (OWNER SHIP) नैव भजते। अयं सर्वदा निश्चयात्मिकां बुद्धि धरति। कदापि चञ्चलबुद्धिं (COFUSED MIND) न वहति। एतादृशः द्वन्द्वातीतः ,आत्मगुणैः सन्तृप्तिम् अधिगम्यमानः उपासकः मम प्रकामम् अभिमतः" इति भगवान् श्राकृष्णः उपासकं प्रति स्वस्य प्रीतिम् अर्जुनाय निवेदयति।

**सः-मे प्रियः - ६**

'अर्जुन! मया उक्तं सर्वं धर्म्यम्। धर्मात् अनपेतम्। जन्मनः सफलतासाधनं हि धर्मः। तत्र सर्वैः प्रयत्नः कार्यः। सः श्रेयोमार्गः एव मया एतावत् उपदिष्टः। स च उपदेशात्मकः श्रेयोमार्गः जन्मनः अमृतत्वं अमरत्वं च सम्पादयति। अतः मया उपदिष्टः जन्मनः सफलतासाधकः श्रेयोमार्गं मानवैः अनुसर्तव्यः अस्ति। वेद, शास्त्र, गुरुजन,महात्मभिः उक्तिषु विश्वासपूर्णं प्रवर्तनमेव श्रद्धा भवति। ये च अनन्यभक्त्या माम् एव शरणं प्राप्य श्रद्धया उपदेशं यथोक्तं पर्युपासते तादृशाःभगवदुपासकाः मम अतीव प्रियाः भवन्ति ' इति भगवान् श्राकृष्णः उपासकं प्रति स्वस्य प्रीतिम् अर्जुनाय निवेदयति।

एवम् अत्र, भगवान् श्रीकृष्णः 'स मे युक्ततमो मतः'इत्यादिना मानवाभ्युदयकरान् विषयान् प्रस्तुतवान्। तत्र भौतिकांशाः सन्ति। आध्यात्मिकाः अंशाः वर्तन्ते। दैविकाश्च विषयाः सन्ति। एते अंशाः निस्सन्देहं मनवानां श्रेयसे च कल्पन्ते।

**५.३.उपसंहारः**

एवम् अत्र श्रीमद्भगवद्गीतायाम् उपासनम् - तद्गतद्वैविध्यम्,सगुणोपासनाय उपायानां कथनम्, मानवाभ्युदयकराणां सद्गुणानां वर्णनम् इत्येवं व्यासात्मकप्रश्नाः प्रश्नाः अत्र संयोजिताः सन्ति। तेषां च प्रश्नानुगुणं रूपकल्पनं किञ्चिदपेक्षितं भवति, तत् च, बहुवारं पठित्वा विद्यार्थिभिः एव विवेचनपुरस्सरं साधनीयं भवति।

**५.४.अभ्यासः**

अ)श्रीमद्भगवद्गीतायां द्वादशोध्यायस्य सारांशं लिखत ?

# RAGHUVAMSAM

महाकवि श्रीकालिदासविरचितं

# रघुवंशम्

मल्लिनाथकृतसंजीविनीसमेतम्

## प्रथमः सर्गः

मातापितृभ्यां जगतो नमो वामार्धजानये।
सद्यो दक्षिणदृक्पातसंकुचद्वामदृष्टये।।

अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम्।
तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः।।

शरणं करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यम्।
करुणामसृणैः कटाक्षपातैः कुरु मामम्ब! कृतार्थसार्थवाहम्।।

वाणीं काणभुजीमजीगणदवाशासीञ्च वैयासिकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत्।
वाचामाकलयद्रहस्यमखिलं यश्चाक्षिपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः।।

मल्लिनाथकविः सोऽयं मन्दात्मानुजिघृक्षया।
व्याचष्टे कालिदासीयं काव्यत्रयमनाकुलम्।।

कालिदासगिरां सारं कालिदासः सरस्वती।
चतुर्मुखोऽथवा साक्षाद्विदुर्नान्ये तु मादृशाः।।

तथापि दक्षिणावर्त-नाथाद्यैः क्षुण्णवर्त्मसु।
वयं च कालिदासोक्तिष्ववकाशं लभेमहि।।

भारती कालिदासस्य दुर्व्याख्याविषमूर्च्छिता।
एषा संजीविनी टीका तामद्योज्जीवयिष्यति।।

इहान्वयमुखेनैव सर्वं व्याख्यायते मया।
नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते।।

इह खलु सकलकविशिरोमणिः कालिदासः-

**'काव्यं यशसेऽर्थकृते व्यवहारविदेऽशिवेतरक्षतये।**
**सद्यः परनिर्वृत्तये कान्तासंमिततयोपदेशयुजे।।'**

(का.प्र.२ इत्याद्यालंकारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयःसाधनतां 'काव्यालापांश्च वर्जये इत्यस्य निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन् रघुवंशाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरि- समाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनभूतविशिष्टदेवतानम- स्कारस्य शिष्टाचारपरिप्राप्तत्वात् 'आशी- र्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्'(काव्या.) इत्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात्काव्य- निर्माणस्य विशिष्टशब्दार्थप्रतिपत्तिमूलकत्वेन विशिष्टशब्दार्थयोश्च 'शब्दजातमशेषं तु धत्ते शर्वस्य वल्लभा। अर्थरूपं यदखिलं धत्ते मुग्धेन्दुशेखरः।।' इति वायुपुराणसंहितावचनबलेन पार्वतीपरमेश्वरा- यत्तत्वदर्शनात्तत्प्रतिपित्सया तावेवभिवादयते-

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।। १.१।।**

वागर्थाविति।। 'वागर्थाविव' इत्येकं पदम्। इवेन सह नित्यसमासो विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वं चेति वक्तव्यम्,एवमन्यत्रापि द्रष्टव्यम्। वागर्थाविव शब्दार्थाविव,संपृक्तौ। नित्यसंबद्धावित्यर्थः। नित्यसंबद्धयोरुपमानत्वेनोपादानात् 'नित्यः शब्दार्थसंबन्धः' इति मीमांसकाः। जगतो लोकस्य पितरौ। माता च पिता च पितरौ, 'पिता मात्रा'(पा.१।२।७०) इति द्वन्द्वैकशेषः। 'मातापितरौ पितरौ मातरपितरौ प्रसू जनयितारौ' इत्यमरः। एतेन शर्वशिवयोः सर्वजगज्जनकतया वैशिष्ट्यमिष्टार्थप्रदानशक्तिः परमकारुणिकत्वं च सूच्यते। पर्वतस्यापत्यं स्त्री पार्वती। 'तस्यापत्यम्'(पा.४।१।९२) इत्यण्, 'टिड्ढाणञ्-'(पा.४।१।१५)इत्यादिना ङीप्। पार्वती च परमेश्वरश्च पार्वतीपरमेश्वरौ। 'परम' शब्दः सर्वोत्तमत्वद्योतनार्थः। मातुरभ्यर्हितत्वादल्पाक्षरत्वाच्च 'पार्वती'शब्दस्य पूर्वनिपातः। वागर्थप्रतिपत्तये शब्दार्थयोः सम्यग्ज्ञानार्थं वन्देऽभिवादये। अत्रोपमालंकारः स्फुट एव। तथोक्तम्- 'स्वतः सिद्धेन भिन्नेन संपन्नेन च धर्मतः। साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकगोपमा।।' इति। प्रायिकश्चोपमालंकारः कालिदासोक्तकाव्यादौ भूदेवताकस्य सर्वगुरोर्मगणस्य प्रयोगाच्छुभलाभः सूच्यते। तदुक्तम्- 'शुभदो मो भूमिमयः' इति। वकारस्यामृतबीजत्वात्प्रचयगमनादिसिद्धिः।। १.१।।

संप्रति कविः स्वाहंकारं परिहरति 'क्व सूर्य-' इत्यादि श्लोकद्वयेन-

**क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।**
**तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।। १.२।।**

क्व सूर्येति।। प्रभवत्यस्मादिति प्रभवः कारणम्। 'ऋदोरप्' (पा.३।३।५७)। 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति साधुः। सूर्यः प्रभवो यस्य स सूर्यप्रभवो वंशः क्व? अल्पो विषयो ज्ञेयोऽर्थो यस्याः सा मे मतिः प्रज्ञा च क्व? द्वौ 'क्व'शब्दौ महदन्तरं सूचयतः। सूर्यवंशमाकलयितुं न शक्नोमीत्यर्थः। तथा च तद्विषयप्रबन्धनिरूपणं तु दूरापास्तमिति भावः। तथा हि-दुस्तरं तरितुमशक्यम्। 'ईषद्दुःसुषु-' (पा.३।३।१२६) इत्यादिना खल्प्रत्ययः। सागरं मोहादज्ञानात् उडुपेन प्लवेन। 'उडुपं तु प्लवः कोलः' इत्यमरः। अथवा,-चर्मावनद्धेन पानपात्रेण। 'चर्मावनद्धमुडुपं प्लवः काष्ठं करण्डवत्' इति सज्जनः। तितीर्षुस्तरितुमिच्छुः। अस्मि भवामि। तरतेः सन्नन्तादुप्रत्ययः। अल्पसाधनैरधिकारम्भो न सुकर इति भावः। इदं च वंशोत्कर्षकथनं स्वप्रबन्धमहत्त्वार्थमेव। तदुक्तम्- 'प्रतिपाद्यमहिम्ना च प्रबन्धो हि महत्तरः' इति।। १.२।।

**मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।**
**प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः।। १.३।।**

मन्द इति।। किं च मन्दो मूढः। 'मूढाल्पापटुनिर्भाग्या मन्दाः स्युः' इत्यमरः। तथापि कवियशःप्रार्थी। कवीनां यशः काव्यनिर्माणेन जातं तत्प्रार्थनाशीलोऽहं प्रांशुनोन्नतपुरुषेण लभ्ये प्राप्ये फले फलविषये लोभादुद्बाहुः फलग्रहणायोच्छ्रितहस्तो वामनः ह्रस्व इव। 'खर्वो ह्रस्वश्च वामनः' इत्यमरः। उपहास्यता-मुपहासविषयताम्। 'ऋहलोर्ण्यत्' (पा.३।१।१२४) इति ण्यत्प्रत्ययः। गमिष्यामि प्राप्स्यामि।। १.३।।

अथ मन्दश्चेत्तर्हि त्यज्यतामयमुद्योग इत्यत आह-

**अथ वा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः।**
**मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः।। १.४।।**

अथ वेति।। अथ वा पक्षान्तरे। पूर्वैः सूरिभिः कविभिर्वाल्मीक्यादिभिः कृतवाग्द्वारे कृतं रामायणादि- प्रबन्धरूपा या वाक् सैव द्वारं प्रवेशो यस्य तस्मिन्। अस्मिन् सूर्यप्रभवे वंशे कुले। जन्मनैकलक्षणः संतानो वंशः। वज्रेण मणिवेधकसूचीविशेषण। 'वज्रं त्वस्त्री कुलिशशास्त्रयोः। मणिवेधे रत्नभेदे' इति केशवः। समुत्कीर्णे विद्धे मणौ रत्ने सूत्रस्येव मे मम गतिः संचारोऽस्ति। वर्णनीये रघुवंशे मम वाक्प्रसरोऽस्तीत्यर्थः।। १.४।।

एवं रघुवंशे लब्धप्रवेशस्तद्वर्णनं प्रतिजानानः 'सोऽहम्' इत्यादिभिः पञ्चभिः श्लोकैः कुलकेनाह-

**सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।**
**आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्।। १.५।।**

सोऽहमिति।। सोऽहम्। 'रघूणामन्वयं वक्ष्ये' (१।९) इत्युत्तरेण संबन्धः। किंविधानां रघूणामित्यत्रोत्तराणि विशेषणानि योज्यानि। आ जन्मनः। जन्मारभ्येत्यर्थः। 'आङ् मर्यादाभिविध्योः' (पा.२।१।१३) इत्यव्ययीभावः,तस्य शुद्धानामित्यनेन सुप्सुपेति समासः। एवमुत्तरत्रापि द्रष्टव्यम्। आजन्मशुद्धानाम्। निषेकादिसर्वसंस्कारसंपन्नानामित्यर्थः। आफलोदयम्। आफलसिद्धेः कर्म येषां ते तथोक्तास्तेषाम्। प्रारब्धान्तगामिनामित्यर्थः। आसमुद्रं क्षितेरीशानाम्। सार्वभौमाणामित्यर्थः। आनाकं रथवर्त्म येषां तेषाम्। इन्द्रसहचारिणामित्यर्थः। अत्र सर्वत्राऽऽङोऽभिविध्यर्थत्वं द्रष्टव्यम्। अन्यथा मर्यादार्थत्वे जन्मादिषु शुद्ध्यभावप्रसङ्गात्।। १.५।।

**यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।**
**यथापराधदण्डानां यथाकालप्रबोधिनाम्।। १.६।।**

यथाविधीति।। विधिमनतिक्रम्य यथाविधि। 'यथासादृश्ये'(पा.२।१।७) इत्यव्ययीभावः। तथा 'हुत'शब्देन सुप्सुपेति समासः। एवं 'यथाकामार्जित-' इत्यादीनामपि द्रष्टव्यम्। यथाविधि हुता अग्नयो यैस्तेषाम्। यथाकाममभिलाषमनतिक्रम्यार्चितार्थिनाम्। यथापराधमपराधमनतिक्रम्य दण्डो येषां तेषाम्। यथाकालं कालमनतिक्रम्य प्रबोधिनां प्रबोधनशीलानाम्। चतुर्भिर्विशेषणैर्देवतायजनातिथिसत्कारदण्डधरत्वप्रजा- पालनसमयजागरूकत्वादीनि विवक्षितानि।। १.६।।

**त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।**
**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।। १.७।।**

त्यागायेति।। त्यागाय सत्पात्रे विनियोगस्त्यागः,तस्मै। 'त्यागो विहापितं दानम्' इत्यमरः। संभृतार्थानां संचितधनानाम्। न तु दुर्व्यापाराय। सत्यायमितभाषिणां मितभाषणशीलानाम्, न तु पराभवाय। यशसे कीर्तये। 'यशः कीर्तिः समज्ञा च' इत्यमरः। विजिगीषूणां विजेतुमिच्छूनाम्। न त्वर्थसंग्रहाय। प्रजायै संतानाय गृहमेधिनां दारपरिग्रहाणाम्, न तु कामोपभोगाय। अत्र 'त्यागाय' इत्यादिषु 'चतुर्थी तदर्थ-' (पा.२।१।३६) इत्यादिना तादर्थ्ये चतुर्थी। गृहैर्दारैर्मेधन्ते संगच्छन्त इति गृहमेधिनः। 'दारेष्वपि गृहाः' इत्यमरः। 'जाया च गृहिणी गृहम्' इति हलायुधः। 'मेधृ

संगमे' इति धातोर्णिनिः। एभिर्विशेषणैः परोपकारित्वं सत्यवचनत्वं यशः परत्वं पितॄणां शुद्धत्वं च विवक्षितानि।। १.७।।

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**
**वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।। १.८।।**

शैशव इति।। शिशोर्भावः शैशवं बाल्यम्। 'प्राणभृज्जातिवयोवचनोद्गात्र' (पा.५।१।१२९) इत्यञ्प्रत्ययः। 'शिशुत्वं शैशवं बाल्यम्' इत्यमरः। तस्मिन्वयसि,अभ्यस्तविद्यानाम्। एतेन ब्रह्मचर्याश्रमो विवक्षितः। यूनो भावो यौवनं तारुण्यम्। युवादित्वादणप्रत्ययः। 'तारुण्यं यौवनं समे'इत्यमरः। तस्मिन्वयसि विषयैषिणां भोगाभिलाषिणाम्। एतेन गृहस्थाश्रमो विवक्षितः। वृद्धस्य भावो वार्धकं वृद्धत्वम्। 'द्वन्द्वमनोज्ञादिभ्यश्च' (पा.५।१।१३३) इति वुञ्प्रत्ययः। 'वार्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणि' इति विश्वः। संघातार्थेऽत्र 'वृद्धाच्च' इति वक्तव्यात्सामूहिको वुञ्। तस्मिन् वार्धके वयसि मुनिनां वृत्तिरिव वृत्तिर्येषां तेषाम्। एतेन वानप्रस्थाश्रमो विवक्षितः। अन्ते शरीरत्यागकाले योगेन परमात्मध्यानेन। 'योगः संनहनोपायध्यान- संगतियुक्तिषु' इत्यमरः। तनुं देहं त्यजन्तीति तनुत्यजः, 'कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः। तनुत्यजां देहत्यागिनाम्। 'अन्येभ्योऽपि दृश्यते' (पा.३।२।१७८) इति क्विप्। एतेन मोक्षभावो विवक्षितः।। १.८।।

**रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।**
**तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः।। १.९।।**

रघूणामिति।। सोऽहं लब्धप्रवेशः। तनुवाग्विभवोऽपि स्वल्पवाणीप्रसारोऽपि सन्। तेषां रघूणां गुणैस्तद्गुणैः। आजन्मशुद्ध्यादिभिः कर्तृभिः कर्णं मम श्रोत्रमागत्य चापलाय चापलं चपलकर्माविमृश्यकरणरूपं कर्तुम्। युवादित्वात्कर्मण्यण्। 'क्रियार्थोपपदस्य-' (पा. २।३।१४) इत्यादिना चतुर्थी। प्रचोदितः प्रेरितः सन्। रघूणामन्वयं तद्विषयप्रबन्धं वक्ष्ये। कुलकम्।। १.९।।

संप्रति स्वप्रबन्धपरीक्षार्थं सतः प्रार्थयते-

**तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।**
**हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ।। १.१०।।**

तमिति।। तं रघुवंशाख्यं प्रबन्धं सदसतोर्गुणदोषयोर्व्यक्तेर्हेतवः कर्तारः सन्तः श्रोतुमर्हन्ति। तथा हि-हेम्नो विशुद्धिर्निर्दोषस्वरूपं श्यामिकापि लोहान्तरसंसर्गात्मको दोषोऽपि वाऽग्नौ

संलक्ष्यते,नान्यत्र। तद्वदत्रापि सन्त एव गुणदोषविवेकाधिकारिणः,नान्य इति भावः।। १.१०।।

वर्ण्यं वस्तूपक्षिपति–

**वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।**
**आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ।। १.११।।**

वैवस्वत इति।। मनस ईषिणो मनीषिणो धीराः,विद्वांस इति यावत्। पृषोदरादित्वात्साधुः। तेषां माननीयः पूज्यः। छन्दसां वेदानाम्। 'छन्दः पद्मे च वेदे च'इति विश्वः। प्रणव ओंकार इव। महीं क्षियन्तीशत इति महीक्षितः क्षितीश्वराः। क्षिधातोरैश्वर्यार्थात्क्विप्,तुगागमश्च। तेषाम्,आद्य आदिभूतः। विवस्वतः सूर्यस्यापत्यं पुमान् वैवस्वतो नाम वैवस्वत इति प्रसिद्धो मनुरासीत्।। १.११।।

**तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।**
**दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ।। १.१२।।**

तदन्वय इति।। शुद्धिरस्यास्तीति शुद्धिमान्। तस्मिन् तस्मिन् शुद्धिमति तदन्वये तस्य मनोरन्वये कुले। 'अन्ववायोऽन्वयो वंशो गोत्रं चाभिजनं कुलम्' इति हलायुधः। अतिशयेन शुद्धिमान् शुद्धिमत्तरः। 'द्विवचनविभज्योप–'(पा.५।३।५७) इत्यादिना तरप्प्रत्ययः। दिलीप इति प्रसिद्धो राजा इन्दुरिव राजेन्दू राजश्रेष्ठः। उपमितं व्याघ्रादिना समासः। क्षीरनिधाविन्दुरिव प्रसूतो जातः।। १.१२।।

'व्यूढ–' इत्यादित्रिभिः श्लोकैर्दिलीपं विशिनष्टि–

**व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।**
**आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ।। १.१३।।**

व्यूढेति।। व्यूढं विपुलमुरो यस्य स व्यूढोरस्कः। 'उरःप्रभृतिभ्यः कप्' (पा.५।४।१५१)। 'व्यूढं विपुलं भद्रं स्फारं समं वरिष्ठं च' इति यादवः। वृषस्य स्कन्ध इव स्कन्धो यस्य स तथा। 'सप्तम्युपमान–'इत्यादिनोत्तरपदलोपी बहुव्रीहिः। शालो वृक्ष इव प्रांशुरुन्नतः शालप्रांशुः। 'प्राकारवृक्षयोः शालः शालः सर्जतरुः स्मृतः।' इति यादवः। 'उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे' इत्यमरः। महाभुजो महाबाहुः। आत्मकर्मक्षमं स्वव्यापारानुरूपं देहमाश्रितः प्राप्तः,क्षात्रः क्षत्रसंबन्धी

धर्म इव स्थितः,मूर्तिमान् पराक्रम इव स्थित इत्युत्प्रेक्षा।। १.१३।।

**सर्वातिरिक्तसारेण सर्वतेजोभिभाविना।**
**स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ।। १.१४।।**

सर्वातिरिक्तेति।। सर्वातिरिक्तसारेण सर्वेभ्यो भूतेभ्योऽधिकबलेन। 'सारोबले स्थिरांशे च' इत्यमरः। सर्वाणि भूगतानि तेजसाऽभिभवतीति सर्वतेजोभिभावी तेन। सर्वेभ्य उन्नतेनात्मना शरीरेण। 'आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि' इति विश्वः। मेरुरिव। उर्वीं क्रान्त्वाऽऽक्रम्य स्थितः। मेरावपि विशेषणानि तुल्यानि। 'अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः। तस्मादभिभवत्येष सर्वभूतानि तेजसा।।' (मनु.७।५)इति मनुवचनाद्राज्ञः सर्वतेजोभिभावित्वं ज्ञेयम् ।। १.१४।।

**आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।**
**आगमैः सदृशारम्भ आरम्भसदृशोदयः ।। १.१५।।**

आकारेति।। आकारेण मूर्त्या सदृशी प्रज्ञा यस्य सः। प्रज्ञया सदृशागमः प्रज्ञानुरूपशास्त्रपरिश्रमः। आगमैः सदृश आरम्भः कर्म यस्य स तथोक्तः। आरभ्यत इत्यारम्भः कर्म। तत्सदृश उदयः फलसिद्धिर्यस्य स तथोक्तः।। १.१५।।

**भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।**
**अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ।। १.१६।।**

भीमेति।। भीमैश्च कान्तैश्च नृपगुणै राजगुणैस्तेजः प्रतापादिभिः
कुलशीलदाक्षिण्यादिभिश्च स दिलीप उपजीविनामाश्रितानाम्। यादोभिर्जलजीवैः। 'यादांसि जलजन्तवः' इत्यमरः। रत्नैश्चार्णव इव। अधृष्योऽनभिभवनीयश्चाभिगम्य आश्रयणीयश्च बभूव।। १.१६।।

**रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परम्।**
**न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः।। १.१७।।**

रेखामात्रमिति।। नियन्तुः शिक्षकस्य सारथेश्च तस्य दिलीपस्य संबन्धिन्यो नेमीनां

चक्रधाराणां वृत्तिरिव वृत्तिर्व्यापारो यासां ताः। 'चक्रधारा प्रधिर्नेमिः' इति यादवः। 'चक्रं रथाङ्गं तस्यान्ते नेमिः सत्री स्यात्प्रधिः पुमान्' इत्यमरः। प्रजाः। आ मनोः,मनुमारभ्येत्यभिविधिः। पदद्वयं चैतत्। समासस्य विभाषितत्वात्। क्षुण्णादभ्यस्तात् प्रहताच्च वर्त्मन आचारपद्धतेरध्वनश्च परमधिकम्। इतस्तत इत्यर्थः। रेखा प्रमाणमस्येति रेखामात्रं रेखाप्रमाणम्। ईषदपीत्यर्थः। 'प्रमाणे द्वयसच्-'(पा.५।२।३७) इत्यादिना मात्रच्प्रत्ययः। परशब्दविशेषणं चैतत्। न व्यतीयुर्नातिक्रान्तवत्यः। कुशलसारथिप्रेरिता रथनेमय इव तस्य प्रजाः पूर्वक्षुण्णमार्गं न जहुरिति भावः।। १.१७।।

**प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।**
**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।। १.१८।।**

प्रजानामिति।। स राजा प्रजानां भूत्या अर्थाय भूत्यर्थं वृद्ध्यर्थमेव। अर्थेन सह नित्यसमासः सर्वलिङ्गता च वक्तव्या। ग्रहणक्रियाविशेषणं चैतत्। ताभ्यः प्रजाभ्यो बलिं षष्ठांशरूपं करमग्रहीत्। 'भागधेयः करो बलिः' इत्यमरः। तथा हि-रविः सहस्रं गुणा यस्मिन्कर्मणि तद्यथा तथा सहस्रगुणं सहस्रधा। उत्स्रष्टुं दातुम्। उत्सर्जनक्रियाविशेषणं चैतत्। रसमम्बु। आदत्ते गृह्णाति। 'रसो गन्धे रसे स्वादेतिक्तादौ विषरागयोः। शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे।।' इति विश्वः।। १.१८।।

संप्रति बुद्धिशौर्यसंपन्नस्य तस्यार्थसाधनेषु परानपेक्षत्वमाह-

**सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम्।**
**शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ।। १.१९।।**

सेनेति।। तस्य राज्ञः सेना चतुरङ्गबलम्। परिच्छाद्यतेऽनेनेति परिच्छद उपकरणं बभूव। छत्रचामरादितुल्यमभूदित्यर्थः। 'पुंसि संज्ञायां घः प्रायेण' (पा.३।३।११८) इति घप्रत्ययः। 'छादेर्घेऽद्व्युपसर्गस्य' (पा.६।४।९६) इत्युपधाह्रस्वः। अर्थस्य प्रयोजनस्य तु साधनं द्वयमेव। शास्त्रेष्वकुण्ठिताऽव्याहता बुद्धिः। 'व्यापृता'इत्यपि पाठः। धनुष्याततताऽऽरोपिता। मौर्वी ज्या च। 'मौर्वी ज्याशिञ्जिनी गुणः' इत्यमरः। नीतिपुरःसरमेव तस्य शौर्यमभूदित्यर्थः।। १.१९।।

राज्यमूलं मन्त्रसंरक्षणं तस्यासीदित्याह–

**तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।**
**फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ।। १.२०।।**

तस्येति।। संवृतमन्त्रस्य गुप्तविचारस्य। 'वेदभेदे गुप्तवादे मन्त्रः' इत्यमरः। शोकहर्षादिसूचको भ्रुकुटीमुखरागादिराकारः। इङ्गितं चेष्टितं हृदयगतविकारो वा। 'इङ्गितं हृद्गतो भावो बहिराकार आकृतिः' इति सज्जनः। गूढे आकारेङ्गिते यस्य। स्वभावचापलाद्भ्रमपरम्परया मुखरागादिलिङ्गैर्वाऽतृतीयगामिमन्त्रस्य तस्य। प्रारभ्यन्त इति प्रारम्भाः सामाद्युपायप्रयोगाः। 'प्राक्'इत्यव्ययेन पूर्वजन्मोच्यते। तत्र भवाः प्राक्तनाः। 'सायंचिरं-'(पा.४।३।२३) इत्यादिना ट्युल्प्रत्ययः। संस्काराः पूर्वकर्मवासना इव फलेन कार्येण अनुमेया अनुमातुं योग्या आसन्। अत्र याज्ञवल्क्यः(आचार.१३।३४४)–'मन्त्रमूलं यतो राज्यमतो मन्त्रं सुरक्षितम्। कुर्याद्यथा तन्न विदुः कर्मणामा फलोदयात्।।' इति।। १.२०।।

संप्रति सामाद्युपायान् विनैवात्मरक्षादिकं कृतवानित्याह–

**जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।**
**अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत्।। १.२१।।**

जुगोपेति।। अत्रस्तोऽभीतः सन्। 'त्रस्नौ भीरुभीरुकभीलुकाः' इत्यमरः। त्रासोपाधिमन्तरेणैव त्रिवर्गसिद्धेः प्रथमसाधनत्वादेवाऽऽत्मानं शरीरं जुगोप रक्षितवान्। अनातुरोऽरुग्ण एव धर्मं सुकृतं भेजे। अर्जितवानित्यर्थः। अगृध्नुरगर्धनशील एवार्थमाददे स्वीकृतवान्। 'गृध्नुस्तु गर्धनः। लुब्धोऽभिलाषुक- स्तृष्णक्समौलोलुपलोलुभौ।' इत्यमरः। 'त्रसिगृधिधृषिक्षिपेः क्नुः'(पा.३।२।१४०) इति क्नुप्रत्ययः। असक्त आसक्तिरहित एव सुखमन्वभूत्।। १.२१।।

परस्परविरुद्धानामपि गुणानां तत्र साहचर्यमासीदित्याह–

**ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।**
**गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।। १.२२।।**

ज्ञान इति।। ज्ञाने परावृत्तान्तज्ञाने सत्यपि मौनं वाङ्नियमनम्। यथाह कामन्दकः– 'नान्योपतापि वचनं मौनं व्रतचरिष्णुता' इति। शक्तौ प्रतीकारसामर्थ्येऽपि क्षमाऽपकारसहनम्। अत्र चाणक्यः–'शक्तानां भूषणं क्षमा' इति। त्यागे वितरणे सत्यपि श्लाघाया विकत्थनस्य

विपर्ययोऽभावः। अत्राह मनुः (४।२३६)-'न दत्त्वा परिकीर्तयेत्' इति। इत्थं तस्य गुणा ज्ञानादयो गुणैर्विरुद्धैर्मौनादिभिः अनुबन्धित्वात्सहचारित्वात्। सह प्रसवो जन्म येषां ते सप्रसवाः सोदरा इवाभूवन्। विरुद्धा अपि गुणास्तस्मिन्नविरोधेनैव स्थिता इत्यर्थः।। १.२२।।

द्विविधं वृद्धत्वं-ज्ञानतो वयसा च;तत्र तस्य ज्ञानेन वृद्धत्वमाह-

**अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।**
**तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना।। १.२३।।**

अनाकृष्टस्येति।। विषयैः शब्दादिभिः। 'रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी' इत्यमरः। अनाकृष्टस्यावशीकृतस्य विद्यानां वेदवेदाङ्गादीनां पारदृश्वनः पारमन्तं दृष्टवतः। दृशेः क्वनिप्। धर्मे रतिर्यस्य तस्य राज्ञो जरसा जरया विना। 'विस्रसा जरा' इत्यमरः। 'षिद्भिदादिभ्योऽङ्' (पा. ३।३।१०४) इत्यङ्प्रत्ययः। 'जराया जरसन्यतरस्याम्' (पा.७।२।१०१) इति जरसादेशः। वृद्धत्वं वार्धकमासीत्। तस्य यूनोऽपि विषयवैराग्यादिज्ञानगुणसंपत्त्या ज्ञानतो वृद्धत्वमासीदित्यर्थः। नाथस्तु-चतुर्विधं वृद्धत्वमिति कृत्वा 'अनाकृष्टस्य' इत्यादिना विशेषणत्रयेण वैराग्यज्ञानशीलवृद्धत्वा- न्युक्तानीत्यवोचत्।। १.२३।।

**प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।**
**स पिता पितरस्तासां केवलं जन्महेतवः।। १.२४।।**

प्रजानामिति।। प्रजायन्त इति प्रजा जनाः। 'उपसर्गे च संज्ञायाम्' (पा.३।२।९९)इति डप्रत्ययः। 'प्रजा स्यात्संततौ जने' इत्यमरः। तासां विनयस्य शिक्षाया आधानात् करणात्। सन्मार्गप्रवर्तनादिति यावत्। रक्षणाद्भयहेतुभ्यस्त्राणात्। आपन्निवारणादिति यावत्। भरणादन्नपादादिभिः पोषणादपि। अपिः समुच्चये। स राजा पिताऽभूत्। तासां पितरस्तु जन्महेतवो जन्म मात्रकर्तारः केवलमुत्पादका एवाभूवन्। जननमात्र एव पितॄणां व्यापारः। सदा शिक्षारक्षणादिकं तु स एव करोतीति तस्मिन्पितृत्वव्यपदेशः। आहुश्च -'स पिता यस्तु पोषकः' इति।। १.२४।।

**स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये।**
**अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः।। १.२५।।**

स्थित्या इति।। दण्डमर्हन्तीति दण्ड्याः। 'दण्डादिभ्यो यत्' (पा. ५।१।३६) इति

यप्रत्ययः। 'अदण्ड्यान्दण्डयन्राजा दण्डयांश्चैवाप्यदण्ड्यन्। अयशो महदाप्नोति नरकं चैव गच्छति।।' (मनु.८।१२८) इति शास्त्रवचनात्। तान् दण्ड्यानेव स्थित्यै लोकप्रतिष्ठायै दण्डयतः शिक्षयतः। प्रसूतये संतानायैव परिणेतुर्दारान्परिगृह्णतः। मनीषिणो विदुषः। दोषज्ञस्येति यावत्। 'विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः। धीरो मनीषो' इत्यमरः। तस्य दिलीपस्यार्थकामावपि धर्म एवाऽऽस्तां जातौ। अस्तेर्लङ्। अर्थकामसाधनयोर्दण्डविवाहयोर्लोकस्थापनप्र- जोत्पादनरूपधर्मार्थत्वेना- नुष्ठानादर्थकामावपि धर्मशेषतामापादयन्स राजा धर्मोत्तरोऽभूदित्यर्थः। आह च गौतमः (९।१०)-'न पूर्वाह्णमध्यंदिनापराह्णानफलान्कुर्यात्। यथाशक्ति धर्मार्थकामेभ्यस्तेषु धर्मोत्तरः स्यात्।।' इति।।१.२५।।

# KATHOPANISHAD

# कठोपनिषद्

शान्तिपाठ

**ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं**
**करवाबहै। तेजस्वि नावधीतमस्तु। मा विद्विषावहै।**

**ॐ शान्तिः शान्तिः शान्तिः।**

सम्बन्ध भाष्य

ॐ नमो भगवते वैवस्वताय मृत्यवे ब्रह्मविद्याचार्याय नचिकेतसे च। सदेर्धातोर्विशरणगत्यव- सादनार्थस्योपनिपूर्वस्य क्विप्रत्ययान्तस्य रूपमुपनिषदिति। उपनिषच्छब्देन च व्याचिख्यासितग्रन्थ- प्रतिपाद्यवेद्यवस्तुविषया विद्योच्यते। केन पुनरर्थयोगेन उपनिषच्छब्देन विद्योच्यत इत्युच्यते।

ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः सन्त उपनिषच्छब्दवाच्यां वक्ष्यमाणलक्षणां विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाद्धिंसनाद् विनाशनादित्यनेनार्थयोगेन विद्या उपनिषदित्युच्यते। तथा च वक्ष्यति--'निचाय्य तं मृत्युमुखात्प्रमुच्यत' (क.उ.१/३/१५) इति।

पूर्वोक्तविशेषणान्मुमुक्षून्वा परं ब्रह्म गमयतीति ब्रह्मगमयितृत्वेन योगाद् ब्रह्मविद्योपनिषद्। तथा च वक्ष्यति--'ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युः' (क.उ.२/३/१८) इति।

लोकादिर्ब्रह्मजज्ञो योऽग्निस्तद्विषयाया विद्याया द्वितियेन वरेण प्रार्थ्यमानायाः स्वर्गलोकफलप्राप्तिहेतुत्वेन गर्भवासजन्मजराद्युपद्रववृन्दस्य लोकान्तरे पौनःपुन्येन प्रवृत्तस्या- वसादयितृत्वेन शैथिल्यापादनेन धात्वर्थयोगादग्निविद्याप्युपनिषदित्युच्यते। तथा च वक्ष्यति-- 'स्वर्गलोका अमृतत्वं भजन्ते' (क.उ.१/१/१३) इत्यादि।

ननु चोपनिषच्छब्देनाध्येतारो ग्रन्थमप्यभिलाषन्ति। उपनिषदमधीमहेऽध्यापयाम इति च।

एवं नैष दोषोऽविद्यादिसंसारः हेतुविशरणादेः सदिधात्वर्थस्य ग्रन्थमात्रेऽसम्भवाद्विद्यायां च सम्भवात्। ग्रन्थस्यापि तादर्थ्येन तच्छब्दत्वोपपत्तेः, आयुर्वै घृतमित्यादिवत्। तस्माद्विद्यायां मुख्यया वृत्त्योपनिषच्छब्दो वर्तते ग्रन्थे तु भक्त्येति।

एवमुपनिषन्निर्वचनेनैव विशिष्टोऽधिकारी विद्यायामुक्तः। विषयश्च विशिष्ट उक्तो विद्यायाः परं ब्रह्म प्रत्यगात्मभूतम्। प्रयोजनं चास्या उपनिषद आत्यन्तिकी संसारनिवृत्तिर्ब्रह्मप्राप्तिलक्षणा। सम्बन्धश्चेवंभूतप्रयोजनेनोक्तः। अतो यथोक्ताधिकारिविषय-प्रयोजनसम्बन्धाया विद्यायाः करतलन्यस्तामलकवत् प्रकाशकत्वेन विशिष्टाधिकारिविष-यप्रयोजनसम्बन्धा एता वल्लयो भवन्ति इत्यतस्ता यथाप्रतिभानं व्याचक्ष्महे।

## प्रथम अध्यायः (प्रथमा वल्ली)

कथमित्युच्यते--

**पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः।**
**अनन्दा नाम ते लोकास्तान्स गच्छति ता ददत्।।३।।**

दक्षिणार्था गावो विशेष्यन्ते। पीतमुदकं याभिस्ताः पीतोदकाः, जग्धं भक्षितं तृणं याभिस्ता जग्धतृणाः, दुग्धो दोहः क्षीराख्यो यासां ता दुग्धदोहाः, निरिन्द्रिया अप्रजननसमर्था जीर्णा निष्फला गाव इत्यर्थः। यास्ता एवंभूता गा ऋत्विग्भ्यो दक्षिणाबुद्धया ददत्प्रयच्छन्ननन्दा अनानन्दा असुखा नामेत्येतद्ये ते लोकास्तान्स यजमानो गच्छति ।।३।।

नचिकेतास्त्वाह--यदि दित्सुर्वरान्--

**शान्तसंकल्पः सुमना यथा स्या द्वीतमन्युर्गौतमो माभि मृत्यो।**
**त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे।।१०।।**

शान्तसंकल्प उपशान्तः सङ्कल्पो यस्य मां प्रति यमं प्राप्य किं नु करिष्यति मम पुत्र इति स शान्तसङ्कल्पः सुमनाः प्रसन्नमनाश्च यथा स्याद्वीतमन्युर्विगतरोषश्च गौतमो मम पिता माभि मां प्रति हे मृत्यो किं च त्वत्प्रसृष्टं त्वया विनिर्मुक्तं प्रेषितं गृहं प्रति मामभिवदेत्प्रतीतो लब्धस्मृतिः

स एवायं पुत्रो ममागत इत्येवं प्रत्यभिजानन्नित्यर्थः। एतत्प्रयोजनं त्रयाणां प्रथममाद्यं वरं वृणे प्रार्थये यत्पितुः परितोषणम्।।१०।।

नचिकेता उवाच तृतीयं वरं नचिकेतो वृणीष्वेत्युक्तः सन्--

**येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।**
**एतद्विद्यामनुशिष्टस्त्वयाहं वराणमेष वरस्तृतीयः ।।२०।।**

येयं विचिकित्सा संशयः प्रेते मृते मनुष्येऽस्तीत्येकेऽस्ति शरीरेन्द्रियमनोबुद्धिव्यतिरिक्तो देहान्तरसम्बन्ध्यात्मेत्येके नायम् अस्तीति चैके नायमेवंविधोऽस्तीति चैकेऽतश्चास्माकं न प्राप्यशक्षेण नापि वानुमानेन निर्णयविज्ञानमेतद्विज्ञानाधीनो हि परः पुरुषार्थ इत्यत एतद्विद्यं विजानीयामहम् अनुशिष्टो ज्ञापितस्त्वया। वराणाम् एष वरस्तृतीयोऽवशिष्टः ।।२०।।

**देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यन्न सुज्ञेयमात्थ।**
**वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित्।।२२।।**

देवैरत्राप्येतस्मिन्वस्तुनि विचिकित्सितं किलेति भवत एव नः श्रुतम्। त्वं च मृत्यो यद्यस्मान्न सुज्ञेयमात्मतत्त्वमात्थ कथयसि, अतः पण्डितैरप्यवेदनीयत्वाद् वक्ता चास्य धर्मस्य त्वादृक्त्वत्तुल्यः अन्यः पण्डितश्च न लभ्यः अन्विष्यमाणोऽपि। अयं तु वरो निःश्रेयसप्राप्तिहेतुः। अतो नान्यो वरस्तुल्यः सदृशोऽस्त्येतस्य कश्चिदप्यनित्यफलत्वादन्यस्य सर्वस्यैवेत्यभिप्रायः ।।२२।।

एवं प्रलोभ्यमानोऽपि नचिकेता महाहदवदक्षोभ्य आह-

**श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः।**
**अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते।।२६।।**

श्वो भविष्यन्ति न भविष्यन्ति वेति संदिह्यमान एव येषां भावो भवनं त्वयोपन्यस्तानां भोगानां श्वोभावाः किं च मर्त्यस्य मनुष्यस्यान्तक हे मृत्यो यदेतत्सर्वेन्द्रियाणां तेजस्तज्जरयन्ति अपक्षयन्त्यप्सरःप्रभृतयो भौगाः अनर्थायैवैते धर्मवीर्यप्रज्ञातेजोयशःप्रभृतीनां क्षपयितृत्वात्। यां चापि दीर्धजीविकां त्वं दित्ससि तत्रापि शृणु। सर्वं यद् ब्रह्मणोऽपि जीवितमायुरत्पमेव किमुतास्मदादिदीर्घजीविका अतस्तवैव तिष्ठन्तु वाहा रथादयः तथा नृत्यगीते च ।। २६।।

## द्वितीया वल्ली

तयोः श्रेय आददनस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीत इत्युक्तं तत्कस्माद्यतः–

**दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता।**
**विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्तन।।४।।**

दूरं दूरेण महातान्तरेणैते विपरीते अन्योन्यव्यावृत्तरूपे विवेकाविवेकात्म-कत्वात्तमःप्रकाशाविव। विषूची विषूच्यौ नानागती भिन्नफले संसारमोक्षहेतुत्वेनेत्येतत्।

के ते इत्युच्यते। या चाविद्या प्रेयोविषया विद्येति च श्रेयोविषया ज्ञाता निर्ज्ञातावगता पण्डितैः। तत्र विद्याभीप्सिनं विद्यार्थिनं नचिकेतसं त्वामहं मन्ये। कस्माद्यस्मादविद्वद्बुद्धिप्रलोभिनः कामा अप्सरःप्रभृतयो बहवोऽपि त्वा त्वां नालोलुपन्त न विच्छेदं कृतवन्तः श्रेयोमार्गादात्मोपभोगा-भिवाञ्छा संपादनेन। अतो विद्यार्थिनं श्रेयोभाजनं मन्य इत्यभिप्रायः ।।४।।

ये तु संसारभाजनाः–

**अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः।**
**दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ।।५।।**

अविद्यायामन्तरे मध्ये घनीभूत इव तमसि वर्तमाना वेष्ट्यमानाः पुत्रपश्वादितृष्णापाशशतैः। स्वयं वयं धीराः प्रज्ञावन्तः पण्डिताः शास्त्रकुशलाश्चेति मन्यमानास्ते दन्द्रम्यमाणा अत्यर्थं कुटिलामनेकरूपां गतिम् इच्छन्तो जरामरणरोगादिदुःखैः परियन्ति परीगच्छन्ति मूढा अविवेकिनोऽन्धेनैव दृष्टिविहीनेनैव नीयमाना विषमे पथि यथा बहवोऽन्धा महान्तमनर्थमृच्छन्ति तद्वत् ।।५।।

यं त्वं ज्ञातुमिच्छस्यात्मानम्–

**तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।**
**अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति।।१२।।**

तं दुर्दर्शं दुःखेन दर्शनम् अस्येति दुर्दर्शोऽतिसूक्ष्मत्वात् गूढं गहनमनुप्रविष्टं प्राकृतविषय-विकारविज्ञानैः प्रच्छन्नमित्येतत्, गुहाहितं गुहायां बुद्धौ स्थितं तत्रोपलभ्यमानत्वात् गह्वरेष्ठं गह्वरे विषमेऽनेकानर्थसंकटे तिष्ठतीति गह्वरेष्ठम्। यत एवं गूढमनुप्रविष्टो गुहाहितश्चातो गह्वरेष्ठः, अतो दुर्दर्शः।

तं पुराणं पुरातनमध्यात्मयोगाधिगमेन विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानम् अध्यात्मयोगस्तस्याधिगमस्तेन मत्वा देवात्मानं धीरो हर्षशोकावात्मन उत्कर्षापकर्षयोः अभावाज्जहाति।।१२।।

इत्येवं पृष्टवते मृत्युरुवाच पृष्टं वस्तु विशेषणान्तरं च विवक्षन्-

**सर्वे वेदा यत्पदमामनन्ति तपाँसि सर्वाणि च यद्वदन्ति।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदँसंग्रहेण ब्रवीम्योमित्येतत् ।।१५।।**

सर्वे वेदा यत्पदं पदनीयं गमनीयमविभागेनामनन्ति प्रतिपादयन्ति तपांसि सर्वाणि च यद्वदन्ति यत्प्राप्त्यर्थानीत्यर्थः। यदिच्छन्तो ब्रह्मचर्यं गुरुकुलवासलक्षणमन्यद्वा ब्रह्मप्राप्त्यर्थं चरन्ति तत्ते तुभ्यं पदं यज्ज्ञातुम् इच्छसि संग्रहेण संक्षेपतो ब्रवीमि।

ओमित्येतत्। तदेतत्पदं यद्बुभुत्सितं त्वया। यदेतद् ओमित्योंशब्दवाच्यमोंशब्दप्रतीकं च ।।१५।।

अतः -

**एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।**
**एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ।।१६।।**

एतद्ध्येवाक्षरं ब्रह्मापरमेतद्ध्येवाक्षरं परं च। तयोर्हि प्रतीकमेतदक्षरम्, एतद्ध्येवाक्षरं ज्ञात्वोपास्यब्रह्मेति यो यदिच्छति परमपरं वा तस्य तद्भवति। परं चेज्ज्ञातव्यमपरं चेत्प्राप्तव्यम् ।।१६।।

यत एवमतः -

**एतदालम्बनँ श्रेष्ठमेतदालम्बनं परम्।**
**एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ।।१७।।**

एतदालम्वनमेतद्ब्रह्मप्राप्त्यालम्बनानां श्रेष्ठं प्रशस्यतमम् एतदालम्बनं परमपरं च परापरब्रह्मविषयत्वात्। एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते परस्मिन् ब्रह्मणि। अपरस्मिंश्च ब्रह्मभूतो ब्रह्मवदुपास्यो भवतीत्यर्थः ।।१७।।

अन्यत्र धर्मादित्यादिना पृष्टस्यात्मनोऽशेषविशेषरहितस्य आलम्बनत्वेन प्रतीकत्वेन चोंकारो निर्दिष्टः अपरस्य च ब्रह्मणो मन्दमध्यमप्रतिपत्तॄन्प्रति। अथेदानीं तस्योङ्कारालम्बनस्यात्मनः

साक्षात्स्वरूपनिर्दिधारयिषया इदमुच्यते-

**न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।**
**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ।।१८।।**

न जायते नोत्पद्यते म्रियते वा न म्रियते चोत्पत्तिमतो वस्तुनोऽनित्यस्य अनेकविक्रियाः तासामाद्यन्ते जन्मविनाशलक्षणे विक्रिये इहात्मनि प्रतिषिध्येते प्रथमं सर्वविक्रियाप्रतिषेधार्थं न जायते म्रियते वेति। विपश्चिन्मेधावी अविपरिलुप्तचैतन्यस्वभावात्।

किं च नायमात्मा कुतश्चित् कारणान्तराद् वभूव। स्वस्माच्च आत्मनो न बभूव कश्चिदर्थान्तरभूतः। अतोऽयमात्माजो नित्यः शाश्वतोऽपक्षयविवर्जितः। यो ह्यशाश्वतः सोऽपक्षीयते; अयं तु शाश्वतोऽत एव पुराणः पुरापि नव एवेति। यो ह्यवयवोपचयद्वारेणाभिनिर्वर्त्यते स इदानीं नवो यथा कुम्भादिः। तद्विपरीतस्त्वात्मा पुराणो वृद्धिविवर्जित इत्यर्थः।

यत एवमतो न हन्यते न हिंस्यते न हिंस्यते हन्यमाने शस्त्रादिभिः शरीरे। तत्स्थोऽप्याकाशवदेव ।। १८।।

**हन्ता चेन्मन्यते हन्तुँहतश्चेन्मन्यते हतम्।**
**उभौ तौ न विजानीतो नायँहन्ति न हन्यते ।।१९।।**

एवं भूतमप्यात्मानं शरीरमात्रात्मदृष्टिर्हन्ता चेद्यदि मन्यते चिन्तयति हन्तुं हनिष्याम्येनम् इति योऽप्यन्यो हतः सोऽपि चेन्मन्यते हतमात्मानं हतोऽहम् इत्युभावपि तौ न विजानीतः; स्वमात्मानं यतो नायं हन्ति अविक्रियत्वादात्मनस्तथा न हन्यत आकाशवदविक्रियत्वादेव। अतोऽनात्मज्ञविषय एव धर्माधर्मादिलक्षणः संसारो न ब्रह्मज्ञस्य। श्रुतिप्रामाण्यान्न्यायाच्च धर्माधर्माद्यनुपपत्तेः ।।१९।।

कथं पुनरात्मानं जानाति इत्युच्यते-

**अणोरणीयान्महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्।**
**तमक्रतुः पश्यति वीतशोको धातुप्रसादान्महिमानमात्मनः ।।२०।।**

अणोः सूक्ष्मादणीयाञ्श्यामाकादेरणुतरः। महतो महत्परिमाणान्महीयान्महत्तरः पृथिव्यादेः अणु महद्वा यदस्ति लोके वस्तु तत्तेनैवात्मना नित्येन आत्मवत्संभवति। तदात्मना विनिर्मुक्तमसत्संपद्यते। तस्मात् असावेवात्माणोरणीयान्महतो महीयान्सर्वनामरूपवस्तूपाधिकत्वात्। स चात्मास्य जन्तोर्ब्रह्मादिस्तम्बपर्यन्तस्य प्राणिजातस्य गुहायां हृदये निहित आत्मभूतः स्थित इत्यर्थः।

तमात्मानं दर्शनश्रवणमननविज्ञानलिङ्गिमक्रतुरकामो दृष्टादृष्टबाह्यविषयो-परतबुद्धिरित्यर्थः। यदा चैवं तदा मनआदीनि करणानि धातवः शरीरस्य धारणात्प्रसीदन्तीत्येषां धातूनां प्रसादादात्मनो महीमानं कर्मनिमित्तवृद्धिक्षयरहितं पश्यत्ययम् अहमस्मीति साक्षाद्विजानाति। ततो वीतशोको भवति ।।२०।।

अन्यथा दुर्विज्ञेयोऽयमात्मा कामिभिः प्राकृतपुरुषैः, यस्मात्-

**आसीनो दूरं व्रजति शयानो याति सर्वतः।**
**कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति ।।२१।।**

आसीनोऽवस्थितोऽचल एव सन् दूरं व्रजति। शयानो याति सर्वत एवमसावात्मा देवो मदामदः समदोऽमदश्च सहर्षोऽहर्षश्च विरुद्धधर्मवानतोऽशक्यत्वाज्ज्ञातुं कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति?

अस्मदादेरेव सूक्ष्मबुद्धेः पण्डितस्य सुविज्ञेयोऽयमात्मा स्थितिगतिनित्यानित्यादिविरुद्धानेक धर्मोपाधिकत्वाद्विरुद्धधर्मवच्चाद्विश्वरूप इव चिन्तामणिवदवभासते। अतो दुर्विज्ञेयत्वं दर्शयति कस्तं मदन्यो ज्ञातुमर्हतीति।

करणानामुपशमः शयनं करणजनितस्यैकदेशविज्ञानस्य उपशमः शयानस्य भवति। यदा चैवं केवलसामान्यविज्ञानत्वात् सर्वतो यातीव यदा विशेषविज्ञानस्थः स्वेन रूपेण स्थित एव सन्मनआदिगतिषु तदुपाधिकत्वाद्दूरं व्रजतीव स चेहैव वर्तते ।।२१।।

तद्विज्ञानाच्च शोकात्यय इत्यपि दर्शयति-

**अशरीरँ शरीरेष्वनवस्थेष्ववस्थितम्।**
**महान्तं विभूमात्मानं मत्वा धीरो न शोचति ।।२२।।**

अशरीरं स्वेन रूपेण आकाशकल्प आत्मा तमशरीरं शरीरेषु देवपितृमनुष्यादिशरीरेषु अनवस्थेष्ववस्थितिरहितेष्ववस्थितं नित्यमवकृतमित्येतत्, महान्तं महच्चस्यापेक्षिकत्वशङ्कायामाह विभुं व्यापिनमात्मानम् - आत्मग्रहणं स्वतोऽनन्यत्वप्रदर्शनार्थम्, आत्मशब्दः प्रत्यगात्मविषय एव मुख्यस्तमीदृशमात्मानं मत्वा अयमहमिति धीरो धीमान्न शोचति। न ह्येवंविधस्यात्मविदः शोकोपपत्तिः ।।२२।।

यद्यपि दुर्विज्ञेयोऽयमात्मा तथाप्युपायेन सुविज्ञेय एवेत्याह–

**नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।**
**यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूँस्वाम् ।।२३।।**

नायमात्मा प्रवचनेनानेकवेदस्वीकरणेन लभ्यो ज्ञेयो नापि मेधया ग्रन्थार्थधारणशक्त्या। न बहुना श्रुतेन केवलेन। केन तर्हि लभ्य इत्युच्यते–

यमेव स्वात्मानमेष साधको वृणुते प्रार्थयते तेनैवात्मना वरित्रा स्वयमात्मा लभ्यो ज्ञायत एवमित्येतत्। निष्कामस्यात्मानम् एव प्रार्थयत आत्मनैवात्मा लभ्यत इत्यर्थः।

कथं लभ्यत इत्युच्यते – तस्यात्मकामस्यैष आत्मा विवृणुते प्रकाशयति पारमार्थिकीं तनूं स्वां स्वकीयां स्वयाथात्म्यम् इत्यर्थः ।।२३।।

किं चान्यत्–

**नाविरतो दुश्चरितान्नाशान्तो नासमाहितः।**
**नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ।।२४।।**

न दुश्चरितात्प्रतिषिद्धाच्छ्रुतिस्मृत्यविहितात्पापकर्मणोऽविरतः अनुपरतो नापीन्द्रियलौल्याद् अशान्तोऽनुपरतो नाप्यसमाहितोऽनेकाग्रमना विक्षिप्तचित्तः समाहितचितोऽपि सन्समाधानफलार्थित्वान्नाप्यशान्तमानसो व्यापृतचित्तः प्रज्ञानेन ब्रह्मविज्ञानेनैनं प्रकृतमात्मानमाप्नुयात्। यस्तु दुश्चरिताद्विरत इन्द्रियलौल्याच्च समाहितचित्तः समाधानफलादप्युपशान्तमानसश्चाचार्यवान्प्रज्ञानेन यथोक्तम् आत्मानं प्राप्नोतीत्यर्थः ।। २४।।

## तृतीया वल्ली

तत्र य उपाधिकृतः संसारी विद्याविद्ययोरधिकृतो मोक्षगमनाय संसारगमनाय च तस्य तदुभयगमने साधनो रथः कल्प्यते–

**आत्मानँ ़रथिनं विद्धि शरीरँ ़रथमेव तु।**
**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ।।३।।**

तत्र तत्रात्मानमृतपं संसारिणं रथिनं रथस्वामिनं विद्धि जानीहि। शरीरं रथमेव तु रथबद्धहयस्थानीयैरिन्द्रियैराकृष्यमाणत्वाच्छरीरस्य। बुद्धिं तु अध्यवसाय लक्षणां सारथिं विद्धि बुद्धिनेतृप्रधानत्वाच्छरीरस्य सारथिनेतृप्रधान इव रथः। सर्वं हि देहगतं कार्यं बुद्धिकर्तव्यमेव प्रायेण। मनः सेकल्पविकल्पादिलक्षणं प्रग्रहं रशनां विद्धि। मनसा हि प्रगृहीतानि श्रेत्रादीनि करणानि प्रवर्तन्ते रशनयेवाश्वाः ।।३।।

**इन्द्रियाणि हयानाहुर्विषयाँ स्तेषु गोचरान्।**
**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।।४।।**

इन्द्रियाणि चक्षुरादीनि हयान् आहू रथकल्पनाकुशलाः शरीररथाकर्षणसामान्यात्। तेष्वेव इन्द्रियेषु हयत्वेन परिकल्पितेषु गोचरान्मार्गान्रूपादीन्विषयान् विद्धि। आत्मेन्द्रियमनोयुक्तं शरीरेन्द्रियमनोभिः सहितं संयुक्तमात्मानं भोक्तेति संसारीत्याहुर्मनीषिणो विवेकिनः।

न हि केवलस्यात्मनो भोक्तृत्वमस्ति बुद्धयाद्युपाधिकृतमेव तस्य भोक्तृत्वम्। तथा च श्रुत्यन्तरं केवलस्याभोक्तृत्वमेव दर्शयति–'ध्यायतीव लेलायतीव' (बृ.उ.४/४/७) इत्यादि। एवं च सति वक्ष्यमाणरथकल्पनया वैष्णवस्य पदस्यात्मतया प्रतिपत्तिरुपपद्यते नान्यथा स्वभावानतिक्रमात् ।।४।।

**यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा।**
**तैस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः।।५।।**

तत्रैवं सति यस्तु बुद्धयाख्यः सारथिरविज्ञानवाननिपुणोऽविवेकी प्रवृत्तौ च निवृत्तौ च भवति यथेतरो रथचर्यायामयुक्तेन अप्रगृहीतेनासमाहितेन मनसा प्रग्रहस्थानीयेन सदा युक्तो भवति तस्याकुशलस्य बुद्धिसारथेः इन्द्रियाण्यश्वस्थानि यान्यवश्यानि अशक्यनिवारणानि दुष्टाश्वा अदान्ताश्वा इवेतरसारथेर्भवन्ति ।।५।।

**यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा।**
**तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ।।६।।**

यस्तु पुनः पूर्वोक्तविपरीतः सारथिर्भवति विज्ञानवानप्रगृहीतमनाः समाहितचित्तः सदा तस्याश्वस्थानीयानीन्द्रियाणि प्रवर्तयितुं निवर्तयियुं वा शक्यानि वश्यानि दान्ताः सदश्वा इवेतरसारथेः।।६।।

तस्य पूर्वोक्तस्याविज्ञानवतो बुद्धिसारथेरिदं फलमाह–

**यस्त्वविज्ञानवान्भवत्यमनस्कः सदाशुचिः।**
**न स तत्पदमाप्नोति सँसारं चाधिगच्छति ।।७।।**

यस्त्वविज्ञानवान्भवति अमनस्कोऽप्रगृहीतमनस्कः स तत एवाशुचिः सदैव, न स रथी तत्पूर्वोक्तमक्षरं यत्परं पदम् आप्नोति तेन सारथिन। न केवलं कैवल्यं नाप्नोति संसारं च जन्ममरणलक्षणमधिगच्छति ।।७।।

**यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः।**
**स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ।।८।।**

यस्तु द्वितीयो विज्ञानवान् वीज्ञानवत्सारथ्युपेतो रथी विद्वान् इत्येतत्; युक्तमनाः समनस्कः स तत एव सदा शुचिः स तु तत्पदमाप्नोति, यस्मादाप्तात्पदाद् अप्रच्युतः सन्भूयः पुनर्न जायते संसारे ।।८।।

किं तत्पदमित्याह–

**विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः।**
**सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ।।९।।**

विज्ञानसारथिर्यस्तु यो विवेकबुद्धिसारथिः पूर्वोक्तो मनःप्रग्रहवान्प्रगृहीतमनाः समाहितचित्तः सञ्शुचिर्नरो विद्वान् सोऽध्वनः संसारगतेः पारं परमेव अधिगन्तव्यमित्येतदाप्नोति मुच्यते सर्वसंसारबन्धनैः तद्विष्णोः व्यापनशीलस्य ब्रह्मणः परमात्मनो वासुदेवाख्यस्य परमं प्रकृष्टं पदं स्थानं सतत्त्वमित्येतद्यदसौ आप्नोति विद्वान् ।।९।।

अधुना यत्पदं गन्तव्यं तस्य इन्द्रियाणि स्थूलान्यारभ्य सूक्ष्मतारतम्यक्रमेण प्रत्यगात्मतया अधिगमः कर्तव्य इत्येवमर्थमिदम् आरभ्यते–

**इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।**
**मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ।।१०।।**

स्थूलानि तावदिन्द्रियाणि तानि यैरर्थैरात्मप्रकाशनाय आरब्धानि तेभ्य इन्द्रियेभ्यः स्वकार्येभ्यस्ते परा ह्यर्थाः सूक्ष्मा महान्तश्च प्रत्यगात्मभूताश्च।

तेभ्योऽप्यर्थेभ्यश्च परं सूक्ष्मतरं महत्प्रत्यगात्मभूतं च मनः। मनःशब्दवाच्यं मनस आरम्भकं भूत- सूक्ष्मं संकल्पविकल्पाद्यारम्भकत्वान् मनसोऽपि परा सूक्ष्मतरा महत्तरा प्रत्यगात्मभूता च बुद्धिः बुद्धिशब्द- वाच्यमध्यवसायाद्यारम्भकं भूतसूक्ष्मम्। बुद्धेरात्मा सर्वप्राणिबुद्धीनां प्रत्यगात्मभूतत्वादात्मा- महान्सर्वा महच्वात्। अव्यक्ताद्यत्प्रथमं जातं हैरण्यगर्भं तत्त्वं बोधाबोधात्मकं महानात्मा बुद्धेः परं इत्युच्यते ।।१०।।

**महतः परमव्यक्तमव्यक्तात्पुरुषः परः।**
**पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ।।११।।**

महतोऽपि परं सूक्ष्मतरं प्रत्यगात्मभूतं सर्वमहत्तरं च अव्यक्तं सर्वस्य जगतो बूजभूतम् अव्याकृतनामरूपसतत्त्वं सर्वकार्यकारणशक्तिसमाहाररूपम् अव्यक्ताव्याकृताकाशादिनामवाच्यं परमात्म- न्योतप्रोतभावेन समाश्रितं वटकणिकायामिव वटवृक्षशक्तिः।

तस्मादव्यक्तात्परः सूक्ष्मतरः सर्वकारणकारणत्वात् प्रत्यगात्मत्वाच्च महांश्च अत एव पुरुषः सर्वपूरणात्। ततोऽन्यस्य परस्य प्रसङ्गं निवारयन्नाह पुरुषान्न परं किंचिदिति। यस्मान्नास्ति पुरुषात् चिन्मात्राघनात् परं किंचिदपि वस्त्वन्तरं तस्मात्सूक्ष्मत्वमहच्वप्रत्यगात्मत्वानां सा काष्ठा निष्ठा पर्यवसानम्।

अत्र हीन्द्रियेभ्य आरभ्य सूक्ष्मत्वादिपरिसमाप्तिः। अत एव च गन्तृणां सर्वगतिमतां संसारिणां परा प्रकृष्टा गतिः ‘यद्गत्वा न निवर्तन्ते‘ (गीता ८/२१/१५/६) इति स्मृतेः ।।११।।

ननु गतिश्चेदागत्यापि भवितव्यम्। कथं यस्माद्भूयो न जायत इति?

नैष दोषः; सर्वस्य प्रत्यगात्मत्वादवगतिरेव गतिरित्युपचर्यते। प्रत्यगात्मत्वं च दर्शतमिन्द्रिय- मनोबुद्धिपरत्वेन। यो हि गन्ता सोऽगतमप्रत्यग्रूपं गच्छत्यनात्मभूतं न विपर्ययेण। तथा च श्रुतिः ‘अनध्वगा अध्वसु पारयिष्णवः इत्याद्या‘। तथा च दर्शयति प्रत्यगात्मत्वं सर्मस्य-

**एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते।**
**दृश्यते त्वग्रयया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभिः ।।१२।।**

एष पुरुषः सर्वेषु ब्रह्मांदिस्तम्बपर्यन्तेषु भूतेषु गूढः सवृतो दर्शनश्रवणादिकर्माविद्या-मायाच्छन्नोऽत एवात्मा न प्रकाशत आत्मत्वेन कस्यचित्। आहो अतिगम्भीरा दुरवगाह्या विचित्र माया चेयं यदयं सर्वो जन्तुः परमार्थतः परमार्थसतत्त्वोऽप्येवं बोध्यमानोऽहं परमात्मेति न गृह्णात्यनात्मानं देहेन्द्रियादिसङ्घातमात्मनो दृश्यमानमपि घटादिवदात्मत्वेनाहममुष्य पुत्र इत्यनुच्यमानोऽपि गृह्णाति। नूनं परस्यैव मायया मोमुह्यमानः सर्वो लोको बम्भ्रमीति। तथा च स्मरणम्- 'नाहं प्रकाशः सर्वस्य योगमायासमावृतः' (गीता ७/२५) इत्यादि।

ननु विरुद्धमिदमुच्यते 'मत्वा धीरो न शोचति' (क.उ.२/१/४) 'न प्रकाशते' (क.उ.१/३/१२) इति च।

नैतदेवम्। असंस्कृतबुद्धेरविज्ञेयत्वान्न प्रकाशत इत्युक्तम्। दृश्यते तु संस्कृतया अग्रयया अग्रमिवाग्रयया तया, एकाग्रतयोपेतयेत्येतत्, सूक्ष्मया सूक्ष्मवस्तुनिरूपणपरया, कै? सूक्ष्मदर्शिभिः 'इन्द्रियेभ्यः परा ह्यर्थाः' इत्यादिप्रकारेण सूक्ष्मतापारम्पर्यदर्शनेन परं सूक्ष्मं द्रष्टुं शीलं येषां ते सूक्ष्मदर्शिनस्तैः सूक्ष्मदर्शिभिः पण्डितैरित्येतत् ।।१२।।

तत्प्रतिपच्युपायमाह-

**यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि।**
**ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ।।१३।।**

यच्छेन्नियच्छेदुपसंहरेत्प्राज्ञो विवेकी; किम्? वाग्वाचम्। वागत्रोपलक्षणार्था सर्वेषामिन्द्रियाणाम्। क्व? मनसी मनसीतिच्छान्दसं दैर्घ्यम्। तच्च मनो यच्छेज्ज्ञाने प्रकाशस्वरूपे बुद्धौ आत्मनि। बुद्धिर्हि मनआदिकरणान्याप्नोतीत्यात्मा प्रत्यक् तेषाम्। ज्ञानं बुद्धिमात्मनि महति प्रथमजे नियच्छेत् प्रथमजवत् स्वच्छस्वभावकमात्मनो विज्ञानम् आपादयेदित्यर्थः। तं च महान्तम् आत्मानं यच्छेच्छान्ते सर्वविशेषप्रत्यस्तमितरूपेऽविक्रिये सर्वान्तरे सर्वबुद्धिप्रत्ययसाक्षिणि मुख्य आत्मनि ।।१३।।

एवं पुरुष आत्मनि सर्वं प्रविलाप्य नामरुपकर्मत्रयं यन्मिथ्याज्ञानविजृम्भितं क्रियाकारकफल्लक्षणं स्वात्मयाथात्म्यज्ञानेन मरीच्युदकरज्जुसर्पगगनमलानीव मरीचिरज्जुगगनस्वरूपदर्शनेनैव स्वस्थः प्रशान्तात्मा कृतकृत्यो भवति यतोऽतस्तदद्दर्शनार्थम्-

**उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।**
**क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति ।।१४।।**

अनाद्यविद्याप्रसुप्ता उत्तिष्ठत हे जन्तव आत्मज्ञानाभिमुखा भवत; जाग्रताज्ञाननिद्राया घोररूपायाः सर्वानर्थबीजभूतायाः क्षयं कुरुत।

कथम्? प्राप्योपगम्य वरान् प्रकृष्टानाचार्यांस्तद्विदस्तदुपदिष्टं सर्वान्तरमात्मानमहमस्मीति निबोधतावगच्छत। नह्युपेक्षितव्यमिति श्रुतिरनुकम्पयाह मातृवत्। अतिसूक्ष्मबुद्धिविषयत्वाज्ज्ञेयस्य। किमिव सूक्ष्मबुद्धिः इत्युच्यते, क्षुरस्य धाराग्रं निशिता तीक्ष्णीकृता दुरत्यया दुःखेनात्ययो यस्याः सा दुरत्यया। यथा सा पद्भयां दुर्गमनीया तथा दुर्गं दुःसम्पाद्यमित्येतत् पथः पन्थानं तत्त्वज्ञानलक्षणं मार्गं कवयो मेधाविनो वदन्ति। ज्ञेयस्यातिसूक्ष्मत्वात्तद्विषयस्य ज्ञानमार्गस्य दुःसम्पाद्यत्वं वदन्तीत्यभिप्रायः ।।१४।।

तत्कथमतिसूक्ष्मत्वं ज्ञेयस्य इत्युच्यते; स्थूला तावदियं मेदिनी शब्दस्पर्शरूपरसगन्धोपचिता सर्वेन्द्रियविषयभूता तथा शरीरम्। तत्रैकैकगुणापकर्षेण गन्धादीनां सूक्ष्मत्वमहत्त्वविशुद्धत्व-नित्यत्वा- दितारतम्यं दृष्टमबादिषु यावदाकाशमिति ते गन्धादयः सर्व एव स्थूलत्वाद्विकाराः शब्दान्ता यत्र न सन्ति किमु तस्य सूक्ष्मत्वादिनिरतिशयत्वं वक्तव्यम् इत्येतद्दर्शयति श्रुतिः-

**अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत्।**
**अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते ।।१५।।**

अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत् एतद्व्याख्यातं ब्रह्माव्ययम् - यद्धि शब्दादिमत्तद्व्येतीदं तु अशब्दादिमच्वादव्ययं न व्येति न क्षीयते, अत एव च नित्यम्। यद्धि व्येति तदनित्यमिदं तु न व्येत्यतो नित्यम्।

इतश्च नित्यम् अनाद्यविद्यमान आदिः कारणम् अस्य तदिदमनादि। यद्ध्यादिमत्तत्काय-'त्वादनित्यं कारणे प्रलीयते यथा पृथिव्यादि। इदं तु सर्वकारणत्वादकार्यमकार्यत्वान्नित्यम्। न तस्य कारणमस्ति यस्मिन्प्रलीयते।

तथानन्तम् अविद्यमानोऽन्तः कार्यमस्य तदनन्तम्। यथा कदल्यादेः फलादिकार्योत्पादनेन अपि अनित्यत्वं दृष्टं न च तथाप्यन्तवच्वं ब्रह्मणः अतोऽपि नित्यम्।

महतो महत्तत्त्वाद् बुद्ध्याख्यात्परं विलक्षणं नित्यविज्ञाप्तिस्वरूपत्वात्सर्वसाक्षि हि सर्वभूतात्मत्वाद् ब्रह्म। उक्तं हि 'एष सर्वेषु भूतेषु' (क.उ.१/३/१२) इत्यादि। ध्रुवं च कूटस्थं

नित्यं न पृथिव्यादिवदापेक्षिकं नित्यत्वम्। तदेवंभूतं ब्रह्मात्मानं निचाय्यावगम्य तमात्मानं मृत्युमुखान्मृत्युगोचरादविद्याकामकर्म- लक्षणात्प्रमुच्यते विमुच्यते ।।१५।।

प्रस्तुतविज्ञानस्तुत्यर्थमाह श्रुतिः-

**नाचिकेतमुपाख्यानं मृत्युप्रोक्तँ सनातनम्।**
**उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते ।।१६।।**

नाचिकेतं नचिकेतसा प्राप्तं नाचिकेतं मृत्युना प्रोक्तं मृत्युप्रोक्तमिदमाख्यानमुपाख्यानं वल्लीत्रयलक्षणं सनातनं चिरन्तनम् वैदिकत्वादुक्त्वा ब्राह्मणेभ्यः श्रुत्वाचार्येभ्यो मेधावी ब्रह्मैव लोको ब्रह्मलोकस्तस्मिन्महीयत आत्मभूत उपास्यो भवतीत्यर्थः ।।१६।।

य इमं परमं गुह्यं श्रावयेद् ब्रह्मसंसदि।

प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते तदानन्त्याय कल्पत इति ।।१७।।

यः कश्चिदिमं ग्रन्थं परमं प्रकृष्टं गुह्यं गोप्यं श्रावयेद् ग्रन्थतोऽर्थतश्च ब्राह्मणानां संसदि ब्रह्मसंसदि प्रयतः शुचिर्भूत्वा श्राद्धकाले वा श्रावयेदु भुज्जानानां तच्छ्राद्धमस्यानन्त्यायानन्तफलाय कल्पते संपद्यते। द्विर्वचनम् अध्यायपरिसमाप्त्यर्थम् ।।१७।।

इति कठोपनिषदि प्रथमोऽध्यायः समाप्तः ।। २।।

## द्वितीय अध्याय (प्रथमा वल्लि)

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते दृश्यते त्वग्रयया बुद्धयेत्युक्तम्। कः पुनः प्रतिबन्धोऽग्रयाया बुद्धेर्येन तदभावाद् आत्मा न दृश्यत इति तददर्शनकारणप्रदर्शनार्था वल्ल्यारभ्यते। विज्ञाते हि श्रेयःप्रतिबन्धकारणे तदपनयनाय यत्न आरब्धुं शक्यते नान्यथेति–

**पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्।**
**कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ।।१।।**

पराञ्चि परागञ्चन्ति गच्छन्तीति खानि तदुपलक्षितानि श्रोत्रादीनीन्द्रियाणि खानीत्युच्यन्ते। तानि पराञ्च्येव शब्दादिविषयप्रकाशनाय प्रवर्तन्ते। यस्मादेवं स्वाभाविकानि तानि व्यतृणर्द्धिसितवान्हननं कृतवान् इत्यर्थः। कोऽसौ? स्वयंभूः परमेश्वरः स्वयमेव स्वतन्त्रो भवति सर्वदा न परतन्त्र इति। तस्मात्पराङ् पराग्रूपाननात्मभूताञ्शब्दादीन्पश्यत्युपलभत उपलब्धा, नान्तरात्मन्नान्तरात्मानमित्यर्थः।

एवंस्वभावेऽपि सति लोकस्य कश्चिन्नद्याः प्रतिस्रोतः प्रवर्तनमिव धीरो धीमान्विवेकी प्रत्यगात्मानं प्रत्यक्चासावात्मा चेति प्रत्यगात्मा। प्रतिच्येवात्मशब्दो रूढो लोके नान्यस्मिन्। व्युत्पत्तिपक्षेऽपि तत्रैवात्मशब्दो वर्तते।

'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह।
यच्चास्य संततो भावस्तस्मादात्मेति कीर्त्यते।' (लिङ्ग. १/७०/१२)
इत्यात्माशब्दव्युत्पत्तिस्मरणात्।

तं प्रत्यगात्मानं स्वं स्वभावमैक्षदपश्यत्पश्यतीत्यर्थः, छन्दसि कालानियमात्। कथं पश्यतीत्युच्यते। आवृत्तचक्षुरावृत्तं व्यावृत्तं चक्षुःश्रोत्रादिकमिन्द्रियजातम् अशेषविषयाद्यस्य स आवृत्तचक्षुः स एवं संस्कृतः प्रत्यगात्मानं पश्यति। न हि बाह्यविषया लोचनपरत्वं प्रत्यगात्मेक्षणं चैकस्य संभवति। किमर्थं पुनरित्थं महता प्रयासेन स्वभावप्रवृत्तिनिरोधं कृत्वा धीरः प्रत्यगात्मानं पश्यति इत्युच्यते, अमृतत्वममरणधर्मत्वं नित्यस्वभावतामिच्छन् आत्मन इत्यर्थः ।।१।।

यत्तावत्स्वाभाविकं परागेव अनात्मदर्शनं तदात्मदर्शनस्य व्रतिबन्धकारणमविद्या तत्प्रतिकूलत्वात्। या च पराक्ष्वेवाविद्योपप्रदर्शितेषु दृष्टादृष्टेषु भोगेषु तृष्णा ताभ्यामविद्यातृष्णाभ्यां प्रतिबद्धात्मदर्शनाः–

**पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम्।**
**अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ।।२।।**

पराचो बहिर्गतानेव कामान् काम्यान्विषयाननुयन्ति अनुगच्छन्ति बाला अल्पप्रज्ञास्ते तेन कारणेन मृत्योरविद्याकामकर्मसमुदायस्य यन्ति गच्छन्ति विततस्य विस्तीर्णस्य सर्वतो व्याप्तस्य पाशं पाश्यते बद्ध्यते येन तं पाशं देहेन्द्रियादिसंयोगवियोगलक्षणम्। अनवरतजन्ममरण-जरारोगाद्यनेकार्थव्रातं प्रतिपद्यन्त इत्यर्थः।

यत एवमथ तस्माद्धीरा विवेकिनः प्रत्यगात्मस्वरूपावस्थानलक्षणममृतत्वं ध्रुवं विदित्वा, देवाद्यमृतत्वं ह्यध्रुवमिदं तु प्रत्यगात्मस्वरूपावस्थानलक्षणं 'न कर्मणा वर्धते नो कनीयान्' (बृ.उ.४/४/२३) इति ध्रुवम्। तदेवंभूतं कूटस्थमविचाल्यममृतत्वं विदित्वाध्रुवेषु सर्वपदार्थेष्वनित्येषु निर्धार्य ब्राह्मणा इह संसारेऽनर्थ,प्राये न प्रार्थयन्ते किंचिदपि प्रत्यगात्मदर्शनप्रतिकूलत्वात्। पुत्रवित्तलोकैषणाभ्यो व्युत्तिष्ठन्त्येवेत्यर्थः ।।२।।

यद्विज्ञानान्न किंचिदन्यत् प्रार्थयन्ते ब्रह्मणाः कथं तदधिगम इत्युच्यते-

**येन रूपं रसं गन्धं शब्दान्स्पर्शांश्च मैथुनान्।**
**एतेनैव विजानाति किमत्र परिशिष्यते। एतद्वै तत् ।।३।।**

येन विज्ञानस्वभावेनात्मना रूपं रसं गन्धं शब्दान्स्पर्शांश्च मैथुनान्मैथुननिमित्तान्सुख-प्रत्ययान्विजानाति विस्पष्टं जानाति सर्वो लोकः।

ननु नैवं प्रसिद्धिलोकस्य आत्मना देहादिविलक्षणेनाहं विजानामीति। देहादिसंघातोऽहं विजानामीति तु सर्वो लोकोऽवगच्छति।

न त्वेवम्। देहादिसंघातस्यापि शब्दादिस्वरूपत्वाविशेषाद्विज्ञेयत्वाविशेषाच्च न युक्तं विज्ञातृत्वम्। यदि हि देहादिसंघातो रूपाद्यात्मकः सन्रूपादीन्विजानीयाद्बाह्या अपि रूपादयोऽन्योन्यं स्वं स्वं रूपं च विजानीयुः। न चैतदस्ति। तस्माद् देहादिलक्षणांश्च रूपादीनेतेनैव देहादिव्यतिरिक्तेनैव विज्ञान- स्वभावेनात्मना विजानाति लोकः। यथा येन लोहो दहति सोऽग्निरिति तद्वत्।

आत्मनोऽविज्ञेयं किमत्रास्मिंल्लोके परिशिष्यते न किंचित्परिशिष्यते। सर्वमेव त्वात्मना विज्ञेयम्। यस्यात्मनोऽविज्ञेयं न किंचित्परिशिष्यते स आत्मा सर्वज्ञः। एतद्वै तत्। किं तद्यत् नचिकेतसा पृष्टं देवादिभिरपि विचिकित्सितं धर्मादिभ्योऽन्यद् विष्णोः परमं पदं यस्मात्परं नास्ति तद्वा एतदधिगतमित्यर्थः।।३।।

अतिसूक्ष्मत्वाद् दुर्विज्ञेयमिति मत्वैतमेवार्थं पुनः पुनराह-

**स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति।**
**महान्तं विभुमात्मानं मत्वा धीरो न शोचति ।।४।।**

स्वप्नान्तं स्वप्नमध्यं स्वप्नविज्ञेयमित्यर्थः तथा जागरितान्तं जागरितमध्यं जागरितविज्ञेयं च; उभौ स्वप्नजागरितान्तौ येन आत्मनानुपश्यति लोक इति सर्वं पूर्ववत्। तं महान्तं विभुमात्मानं मत्वावगम्यात्मभावेन साक्षात् अहमस्मि परमात्मेति धीरो न शोचति ।।४।।

**यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत।**
**गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत।। एतद्वै तत् ।।६।।**

यः कश्चिन्मुमुक्षुः पूर्वं प्रथमं तपसो ज्ञानादिलक्षणाद् ब्रह्मण इत्येतज्जातमुत्पन्नं हिरण्यगर्भम्; किमपेक्ष्य पूर्वमित्याह – अद्भ्यः पूर्वमप्सहितेभ्यः पञ्चभूतेभ्यो न केवलाभ्योऽद्भ्य इत्यभिप्रायः; अजायत उत्पन्नो यस्तं प्रथमजं देवादिशरीराण्युत्पाद्य सर्वप्राणिगुहां हृदयाकाशं प्रविश्य तिष्ठन्तं शब्दादीनुपलाभमानं भूतेभिर्भूतैः कार्यकरणलक्षणैः सह तिष्ठन्तं यो व्यपश्यत यः पश्यतीत्येतत्। य एवं पश्यति स एतदेव पश्यति यत्तत्प्रकृतं ब्रह्म ।।६।।

**या प्राणेन संभवत्यदितिर्देवतामयी।**
**गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत।। एतद्वै तत् ।।७।।**

या सरवदेवतामयी सरवदेवतात्मिका प्राणेन हिरण्यगर्भरूपेण परस्माद् ब्रह्मणः संभवति शब्दादीनामदनाददितिस्तां पूर्ववद् गुहां प्रविश्य तिष्ठन्तीमदितिम्। तामेव विशिनष्टि – या भूतेभिः भूतैः समन्विता व्यजायत उत्पन्ना इत्येतत्।।७।।

किं च–

**यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति।**
**तं देवाः सर्वे अर्पितास्तदु नात्येति कश्चन।। एतद्वै तत् ।।९।।**

यतश्च यस्मात्प्राणादुदेति उत्तिष्ठति सूर्योऽस्तं निम्लोचनं यत्र यस्मिन्नेव च प्राणोऽहन्यहनि गच्छति तं प्राणमात्मानं देवा अग्नयादयोऽधिदैवं वागादयश्च अध्यात्मं सर्वे विश्वेऽरा इव स्थनाभावर्पिताः संप्रवेशिताः स्थितिकाले सोऽपि ब्रह्मैव। तदेतत् सर्वात्मकं ब्रह्म तदु नात्येति नातीत्य तदात्मकतां तदन्यत्वं गच्छति कश्चन कश्चिदपि। एतद्वै तत् ।।९।।

प्रागेकत्वविज्ञानादाचार्यागमसंस्कृतेन–

**मनसैवेदमाप्तव्यं नेह नानास्ति किंचन।**
**मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ।।११।।**

मनसेदं ब्रह्मैकरसमाप्तव्यम् आत्मैव नान्यदस्तीति। आप्ते च नानात्वप्रत्युपस्थापिकाया अविद्याया निवृत्तत्वादिह ब्रह्मणि नाना नास्ति किञ्चनाणुमात्रम् अपि। यस्तु पुनरविद्यातिमिरदृष्टिं न मुञ्चति नानेव पश्यति स मृत्योर्मृत्यं गच्छत्येव स्वल्पमपि भेदमध्यारोपयन् इत्यर्थः ।।११।।

पुनरपि तदेव प्रकृतं ब्रह्माह–

**अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।**
**ईशानो भूतभव्यस्य न ततो विजुगुप्सते।। एतद्वै तत् ।।१२।।**

अङ्गुष्ठमात्रोऽङ्गुष्ठपरिमाणः अङ्गुष्ठपरिमाणं हृदयपुण्डरीकं तच्छिद्रवर्त्यन्तः करणोपाधिः अङ्गुष्ठमात्रोऽङ्गुष्ठमात्रवंशपर्वमध्यवर्त्यम्बरवत् पुरुषः पूर्णमनेन सर्वमिति मध्य आत्मनि शरीरे तिष्ठति यस्तमात्मानम् ईशानं भूतभव्यस्य विदित्वा न तत् इत्यादि पीर्ववत् ।।१२।।

किं च–

**अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः।**
**ईशानो भूतभव्यस्य स एवाद्य स उ श्वः।। एतद्वै तत् ।।१३।।**

अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकोऽधूमकमिति युक्तं ज्योतिष्परत्वात्। यस्त्वेवं लक्षितो योगिभिर्हृदय ईशानो भूतभव्यस्य स नित्यः कूटस्थोऽद्येदानीं प्राणिषु वर्तमानः स उ श्वोऽपि वर्तिष्यते नान्यस्तत्समोऽन्यश्च जनिष्यत इत्यर्थः। अनेन नायमस्तीति चैक इत्ययं पक्षो न्यायतोऽप्राप्तोऽपि स्ववचनेन श्रुत्या प्रत्युक्तस्तथा क्षणभङ्गवादश्च ।।१३।।

पुनरपि भेददर्शनापवादं ब्रह्मण आह–

**यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति।**
**एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति ।।१४।।**

यथोदकं दुर्गे दुर्गमे देश उच्छ्रिते वृष्टं सिक्तं पर्वतेषु पर्वतवत्सु निम्नप्रदेशेषु विधावति विकीर्णं सद्विनश्यति एवं धर्मान् आत्मनो भिन्नान्पृथक्पश्यन्पृथक् एव प्रतिशरीरं पश्यंस्तानेव शरीरभेदानुवर्तिनोऽनुविधावति। शरीरभेदमेव पृथक्पुनः पुनः प्रतिपद्यत इत्यर्थः ।।१४।।

यस्य पुनर्विद्यावतो विध्वस्तोपाधिकृतभेददर्शनस्य विशुद्धविज्ञानघनैकरसमद्वयमात्मानं पश्यतो विजानतो मुनेर्मननशीलस्य आत्मस्वरूपं कथं सम्भवतीत्युच्यते–

**यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति।**
**एवं मुनेर्विजानत आत्मा भवति गौतम ।।१५।।**

यथोदकं शुद्धे प्रसन्ने शुद्धं प्रसन्नमासिक्तं प्रक्षिप्तमेकरसमेव नान्यथा तादृगेव भवत्यात्माप्येवमेव भवत्येकत्वं विजानतो मुनेर्मननशीलस्य हे गौतम! तस्मात्कुतार्किकभेददृष्टिं नास्तिक कुदृष्टिं चोज्झित्वा मातृपितृसहस्रेभ्योऽपि हितैषिणा वेदेनोपदिष्टम् आत्मैकत्वदर्शनं शान्तदर्पैः आदरणीयमित्यर्थः ।।१५।।

## द्वितीया वल्ली

पुनरपि प्रकारान्तरेण ब्रह्मतत्त्वनिर्धारणार्थोऽयमारम्भो दुर्विज्ञेयत्वाद् ब्रह्मणः-

**पुरमेकादशद्वारमजस्यावक्रचेतसः।**
**अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते। एतद्वै तत् ।।१।।**

पुरं पुरमिव पुरम्। द्वारपालाधिष्ठात्राद्यनेकपुरोपकरणसम्पत्तिदर्शनाच्छरीरं पुरम्। पुरं च सोपकरणं स्वात्मनासंहतस्वतन्त्रस्वाम्यर्थं दृष्टम्; तथेदं पुरसामान्यादनेकोपकरणसंहतं शरीरं स्वात्मनासंहत- राजस्थानीयस्वाम्यर्थं भवितुमर्हति।

तच्चेदं शरीराख्यं पुरमेकादशद्वारमेकादशद्वाराण्यस्य सप्त शीर्षण्यानि न्भ्या सहार्वाञ्चि त्रीणि शिरस्येकंतैरेकादशद्वारं पुरम्। कस्याजस्य जन्मादिविक्रियारहितस्यात्मनो राजस्थानीयस्य पुरधर्म- विलक्षणस्य। अवक्रचेतसः अवक्रमकुटिलमादित्यप्रकाशवन्नित्यमेवावस्थितमेकरूपं चेतो विज्ञानमस्येत्यव- क्रचेतास्तस्यावक्रचेतसो रीजस्थानीयस्य ब्रह्मणः।

यस्येदं पुरं तं परमेश्वरं पुरस्वामिनमनुष्ठाय ध्यात्वा-ध्यानं हि तस्यानुष्ठानं सम्यग्विज्ञानपूर्वकम् - तं सर्वैषणाविनिर्मुक्तः सन्समं सर्वभूतस्थं ध्यात्वा न शोचति। तद्विज्ञानाद् अभयप्राप्तेः शोकावसराभावात् कुतो भयेक्षा। इहैवाविद्याकृतकामकर्मबन्धनैर्विमुक्तो भवति। विमुक्तश्च सन्विमुच्यते पुनः शरीरं न गृह्णतीत्यर्थः ।।१।।

स तु नैकशरीरपुरवर्त्येवात्मा किं तार्हि सर्वपूरवर्ती। कथम्-

**हँसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।**
**नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ।।२।।**

हंसो हन्ति गच्छतीति शुचिषच्छुचौ दिव्यादित्यात्मना सीदति इति। वसुर्वासयति सर्वानिति वाट्वात्मनान्तरिक्षे सीदतीत्यन्तरिक्षसत्। होताग्निः 'अग्निर्वै होता' इति श्रुतेः । वेद्यां पृथिव्यां

सीदतीति वेदिषद्। 'इयं वेदिः परोऽन्तः पृथिव्याः' (ऋ.सं.२/३/२०) इत्यादिमन्त्रवर्णात्। अतिथिः सोमः सन्दुरोणे कलशे सीदति इति दुरोणसत्। ब्राह्मणः अतिथिरूपेण वा दुरोणेषु गृहेषु सीदतीति।

तृषन्नृषु मनुष्येषु सीदतीति नृषत्। वरसद् वरेषु देवेषु सीदतीति, ऋतसदृतं सत्यं यज्ञो वा तस्मिन्सीदतीति। व्योमसद् व्योम्न्याकाशे सीदतीति व्योमसत्। अब्जा अप्सु शङ्खशुक्तिमकरादिरूपेण जायत इति। गोजा गवि पृथिव्यां व्रीहियवादिरूपेण जायत इति। ऋतजा यज्ञाङ्गरूपेण जायत इति। अद्रिजा पर्वतेभ्यो नद्यादिरूपेण जायत इति।

सर्वात्मापि सन्नृतमवितथस्वभाव एव । बृहन्महान्सर्वकारणत्वात्। यदाप्यादित्य एव मन्त्रेणोच्यते तदाप्यस्यात्मस्व रूपत्वमादित्यस्येत्यङ्गीकृतत्वाद् ब्राह्मणव्याख्यानेऽप्यविरोधः। सर्वव्याप्येक एवात्मा जगतो नात्मभेद इति मन्त्रार्थः ।।२।।

आत्मनः स्वरूपाधिगमे लिङ्गमुच्यते–

**ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति।**
**मध्ये वामनमासीनं विश्वे देवा उपासते।।३।।**

ऊर्ध्वं हृदयात्प्राणं प्राणवृत्तिं वायुमुन्नयत्यूर्ध्वं गमयति। तथापानं प्रत्यगधोऽस्यति क्षिपति य इति वाक्यशेषः तं मध्ये हृदयपुण्डरीकाकाश आसीनं बुद्धावभिव्यक्तविज्ञानप्रकाशनं वामनं संभजनीयं विश्वे सर्वे देवाश्चक्षुरादयः प्राणा रूपादिविज्ञानं बलिमुपाहरन्तो विश इव राजानमुपासते तादर्थ्येनानुपरतव्यापारा भवन्ति इत्यर्थः। यदर्था यत्प्रयुक्ताश्च सर्वे वायुकरणव्यापाराः सोऽन्यः सिद्ध इति वाक्यार्थः।।३।।

किं च–

**अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः।**
**देहाद्विमुच्यमानस्य किमत्र परिशिष्यते। एतद्वै तत्।।४।।**

अस्य शरीरस्थस्यात्मनो विस्रंसमानस्यावस्रंसमानस्य भ्रंशमानस्य देहिनो देहवतः; विस्रंसनशब्दार्थमाह–देहाद्विमुच्य मानस्येति किमत्र परिशिष्यते प्राणादिकलापे न कींचन परिशिष्यतेऽत्र देहे पुरस्वामिविद्रवण इव पुरवासिनां यस्यात्मनोपगमे क्षणमात्रात्कार्यकरणकलापरूपं सर्वमितं हतबलं विध्वस्तं भवति विनष्टं भवति सोऽन्यः सिद्धः।।४।।

स्यान्मतं प्राणापानाद्यपगमात् एवेदं विध्वस्तं भवति न तु तद्व्यतिरिक्तात्मापगमात्प्राणादिभिरेव हि मर्त्यो जीवतीति नैतदस्ति-

**न प्राणेन नापानेन मर्त्यो जीवति कश्चन।**
**इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ।।५।।**

न प्राणेन नापानेन चक्षुरादिना वा मर्त्यो मनुष्यो देहवान्कश्चन जीवति न कोऽपि जीवति न ह्येषां परार्थानां संहत्यकारित्वाज्जीवनहेतुत्वमुपपद्यते। स्वार्थेनासंहतेन परेण केनचिदप्रयुक्तं संहतानामवस्थानं न दृष्टं गृहादीनां लोके; तथा प्राणादीनामपि संहतत्वाद्भवितुमर्हति।

अत इतरेणैव संहतप्राणादिविलक्षणेन तु सर्वे संहता सन्तो जीवन्ति प्राणान्धारयन्ति। यस्मिन्संहतविलक्षण आत्मनि सति परस्मिन्नेतौ प्राणापानौ चक्षुरादिभिः संहतावुपाश्रितौ, यस्यासंहतस्यार्थे प्राणापानादिः स्वव्यापारं कुर्वन्वर्तते संहतः सन्सः ततोऽन्यः सिद्ध इत्यभिप्रायः।।५।।

**हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्।**
**यथा च मरणं प्राप्य आत्मा भवति गौतम ।। ६।।**

हन्तेदानीं पुनरपि ते तुभ्यम् इदं गुह्यं गोप्यं ब्रह्म मनातनं चिरन्तनं प्रवक्ष्यामि यद्विज्ञानात् सर्वसंसारोपरमो भवति, अविज्ञानाच्च यस्य मरणं प्राप्य यथात्मा भवति यथा संसरति तथा श्रृणु हे गौतम ।।६।।

**योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।**
**स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ।।७।।**

योनिं योनिद्वारं शुक्रबूजसमन्विताः सन्तोऽन्ये केचिद् अविद्यावन्तो मूढाः प्रपद्यन्ते शरीरत्वाय शरीरग्रहणार्थं देहिनो देहवन्तः; योनिं प्रविशन्तीत्यर्थः। स्थाणुं वृक्षादिस्थावरभावम् अन्येऽत्यन्ताधमा मरणं प्राप्यानुसंयन्त्यनुगच्छन्ति। यथाकर्म यद्यस्य कर्म तद्यथाकर्म यैर्यादृशं कर्मेह जन्मनि कृतं तद्वशेनेत्येतत्। तथा च यथाश्रुतं यादृशं च विज्ञानमुपार्जितं तदनुरूपमेव शरीरं प्रतिपद्यन्त इत्यर्थः। 'यथाप्रज्ञं हि संभवाः' इति श्रुत्यन्तरात्।।७।।

यत्प्रतिज्ञातं गुह्यं ब्रह्म वक्ष्यामीति तदाह-

य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः तदेव शुक्रं तद्ब्रह्म

तदेवामृतमुच्यते। तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन। एतद्वै तत्॥८॥

य एष सुप्तेषु प्राणादिषु जागर्ति न स्वपिति। कथम्? कामं कामं तं तमभिप्रेतं ख्याद्यर्थमविद्यया निर्मिमाणो निष्पादयञ्जागर्ति पुरुषो यस्तदेव शुक्रंशुभ्रंशुद्धं तद्ब्रह्म नान्यद्गुह्यं ब्रह्मास्ति। तदेवामृतमविनाशि उच्यते सर्वशास्त्रेषु। किं च पृथिव्यादयो लोकास्तस्मिन्नेब सर्वे ब्रह्मण्याश्रिताः सर्वलोककारणत्वात्तस्य। तदु नात्येति कश्चन इत्यादि पूर्ववदेव॥८॥

अनेकतार्किककुबुद्धिविचालितान्तःकरणानां प्रमाणोपपन्नम् अप्यात्मैकत्वविज्ञानमस-कृदुच्यमानमप्यनृजुबुद्धीनां ब्राह्मणानां चेतसि नाधीयत इति तत्प्रतिपादन आदरवती पुनः पुनराह श्रुतिः-

**अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**
**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥९॥**

अग्निर्यथैक एव प्रकाशात्मा सन्भुवनं भवन्त्यस्मिन्भूतानीति भूवनमयं लोकस्तमिमं प्रविष्टः अनुप्रविष्टः रूपं रूपं प्रतिदार्वादिदाह्यभेदं प्रतित्यर्थः प्रतिरूपः तत्र तत्र प्रतिरूपवान्दाह्यभेदेन बहुविधो बभूव; एक एव तथा सर्वभूतान्तरात्मा सर्वेषां भूतानाम् अभ्यन्तर आत्मातिसूक्ष्मत्वाद् दार्वादिष्विव सर्वदेहं प्रति प्रविष्टत्वात्प्रतिरूपो बभूव बहिश्च स्वेन अविकृतेन स्वरूपेणाकाशवत्॥९॥

तथान्यो दृष्टान्तः-

**वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**
**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥१०॥**

वायुर्यथैक इत्यादि। प्राणात्मना देहेष्वनुप्रविष्टो रूपं रूपं प्रतिरूपो बभूवेत्यादि समानम्॥१०॥

एकस्य सर्वात्मत्वे संसारदुःखित्वं परस्यैव तदिति प्राप्तमत इदमुच्यते-

**सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः।**
**एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः॥११॥**

सूर्यो यथा चक्षुष आलोकेन उपकारं कुर्वन्मूत्रपुरीषाद्यशुचिप्रकाशनेन तद्दर्शिनः सर्वलोकस्य चक्षुरपि सन्न लिप्यते चाक्षुषैरशुच्यादिदर्शननिमित्तैराध्यात्मिकैः पापदोषैर्बाह्यैश्चाशु-च्यादिसंसर्गदोषैः। एकः संस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः।

लोको ह्यविद्यया स्वात्मनि अध्यस्तया कामकर्मोद्भवं दुःखम् अनुभवति। न तु सा परमार्थतः स्वात्मनि। यथा रज्जुशुक्तिकोषरगगनेषु सर्परजतोदकमलानि न रज्ज्वादीनां स्वतो दोषरूपाणि सन्ति। संसर्गिणीविपरीतबुद्ध्यध्यासनिमित्तात्तद्दोषवद्विभाव्यन्ते। न तद्दोषैस्तेषां लेपः। विपरीतबुद्ध्यध्यासबाह्या हि ते।

तथात्मनि सर्वो लोकः क्रियाकारकफलात्मकं विज्ञानं सर्पादिस्थानीयं विपरीतमध्यस्य तन्निमित्तं जन्ममरणादिदुःखमनुभवति। न त्वात्मा सर्वलोकात्मापि सन् विपरीताध्यारोपनिमित्तेन लिप्यते लोकदुःखेन। कुतः बाह्यः, रज्जवादिवदेव विपरीतबुद्ध्यध्यासबाह्यो हि स इति।।११।।

किं च–

**एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति।**
**तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ।।१२।।**

स हि परमेश्वरः सर्वगतः स्वतन्त्र एको न तत्समोऽभ्यधिको वान्योऽस्ति। वशी सर्वं ह्यस्य जगद्वशे वर्तते। कुतः? सर्वभूतान्तरात्मा। यत एकमेब सदैकरसमात्मानं विशुद्धविज्ञानरूपं नामरूपाद्य– शुद्धोपाधिभेदवशेन बहुधानेकप्रकारं यः करोति स्वात्मसत्तामात्रेणचिन्त्यशक्तित्वात्। तमात्मस्थं स्वशरीरहृदयाकाशे बुद्धौ चैतन्याकारेण अभिव्यक्तमित्येतत्।

न हि शरीरस्याधारत्वमात्मनः आकाशवदमूर्तत्वात्; आदर्शस्थं मुखमिति यद्वत्। तमेतम् ईश्वरमात्मानं ये निवृत्तबाह्यवृत्तयोऽनुपश्यन्ति आचार्यागमोपदेशमनु साक्षादनुभवन्ति धीरा विवेकिनस्तेषां परमेश्वरभूतानां शाश्वतं नित्यं सुखम् आत्मानन्दलक्षणं भवति, नेतरेषां बाह्यासक्तबुद्धीनामविवेकिनां स्वात्मभूतमप्यविद्याव्यवधानात्।।१२।।

## तृतीया वल्ली

कथमसौ बोद्धव्यः किं वा तदवबोधे प्रयोजनमित्युच्यते–

**इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत्।**
**पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ।।६।।**

इन्द्रियाणां श्रोत्रादीनां स्वस्वविषयग्रहणप्रयोजनेन स्वकारणेभ्य आकाशादिभ्यः पृथगू उत्पद्यमाना– नामत्यन्तविशुद्धात् केवलाच्चिन्मात्रात्मस्वरूपात्पृथग्भावं स्वभावविलक्षणात्मकतां तथा तेषामेवेन्द्रियाणा– मुदयास्तमयौ चोत्पत्तिप्रलयौ जाग्रत्स्वापावस्थापेक्षया नात्मन इति मत्वा ज्ञात्वा विवेकलो धीरो धीमान्न शोचति। आत्मनो नित्यैकस्वभावस्य अव्यभिचाराच्छोककारणत्वानुपपत्तेः। तथा च श्रुत्यन्तरम् 'तरति शोकमात्मवित्' (छा.उ.७/१/३) इति।।६।।

यस्मादात्मन इन्द्रियाणां पृथग्भाव उक्तो नासौ बहिरधिगन्तव्यो यस्मात्प्रत्यगात्मा स सर्वस्य। तत्कथमित्युच्यते–

**इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम्।**
**सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ।।७।।**

इन्द्रियेभ्यः परं मन इत्यादि। अर्थानामिहेन्द्रियसमानजातीय– त्वादिन्द्रियग्रहणेनैव ग्रहणम्। पूर्ववदन्यत्। सत्त्वशब्दाद् बुद्धिरिहोच्यते ।।७।।

**अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च।**
**यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ।।८।।**

अव्यक्तात्तु परः पुरुषो व्यापको व्यापकस्याप्याकाशादेः सर्वस्य कारणत्वात्। अलिङ्गो लिङ्गयते गम्यते येन तल्लिङ्गं बुद्ध्यादि तदविद्यमानमस्येति शोऽयमलिङ्ग एव। सर्वसंसारधर्मवर्जित इत्येतत्। यं ज्ञात्वा आचार्यतः शास्त्रतश्च मुच्यते जन्तुः अविद्यादिहृदयग्रन्थिभिर्जीवन्नेव पतितेऽपि शरीरेऽमृतत्वं च गच्छति सोऽलिङ्गः परोऽव्यक्तात् पुरुष इति पूर्वेणैव सम्बन्धः।।८।।

कथं तर्ह्यलिंङ्गस्य दर्शनम् लपपद्यत इत्युच्यते–

**न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्।**
**हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ।।९।।**

न संदृशे संदर्शनविषये न तिष्ठति प्रत्यगात्मनोऽस्य रूपम्। अतो न चक्षुषा सर्वेन्द्रियेण चक्षुर्ग्रहणस्योपलाक्षणार्थत्वात्, पश्यति नोपलभते कश्चन कश्चिद् अप्येनं प्रकृतमात्मानम्।

कथं तर्हि तं पश्येदित्युच्यते। हृदा हृत्स्थया बुद्ध्या। मनीषा मनसः सङ्कल्पादिरूपस्येष्टे नियन्तृत्वेनेति मनीट् तया हृदा मनीषाविकल्पयित्र्या मनसा मननरूपेण सम्यग्दर्शनेन अभिक्लृप्तोऽभिसमर्थितोऽभिप्रकाशित इत्येतत्। आत्मा ज्ञातुं शक्यत इति वाक्यशेषः तम् आत्मानं ब्रह्मैतद्ये विदुरमृतास्ते भवन्ति ।।९।।

सा हृन्मनीट् कथं प्राप्यत इति तदर्थो योग उच्यते-

**यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।**
**बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्।।१०।।**

यदा यस्मिन्काले स्वविषयेभ्यो निवर्तितान्यात्मन्येव पञ्च ज्ञानानि ज्ञानार्थत्वाच्छ्रोत्रादीनि इन्द्रियाणि ज्ञानान्युच्यन्ते अवतिष्ठन्ते सह मनसा यदनुगतानि तेन संकल्पादिव्यावृत्तेनान्तःकरणेन, बुद्धिश्चाध्यवसायलक्षणा न विचेष्टति स्वव्यापारेषु न विचेष्टते न व्याप्रियते तामाहुः परमां गतिम्।।१०।।

**तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।**
**अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ।।११।।**

तामीदृशीं तदवस्थां योगम् इति मन्यन्ते वियोगमेब सन्तम्। सर्वानर्थसंयोगवियोगलक्षणा हीयमवस्था योगिनः। एतस्यां ह्यवस्थायामविद्याध्यारोपणवर्जितस्वरूपप्रतिष्ठ आत्मा। स्थिराम् इन्द्रियधारणां स्थिरामचलाम् इन्द्रियधारणां बाह्यान्तःकारणानां धारणमित्यर्थः।

अप्रमत्तः प्रमादवर्जितः समाधानं प्रति नित्यं यत्नवांस्तदा तस्मिन्काले यदैव प्रवृत्तयोगो भवतीति सामर्थ्यादवगम्यते। न हि बुद्ध्यादिचेष्टाभावे प्रमादसंभवोऽस्ति। तस्मात्प्रागेव बुद्ध्यादिचेष्टोपरमादप्रमादो विधीयते। अथवा यदैवेन्द्रियाणां स्थिरा धारणा तदानीमेव निरङ्कुशमप्रमत्तत्वमित्यतः अभिधीयतेऽप्रमत्तस्तदा भवतीति। कुतः? योगो हि यस्मात् प्रभवाप्ययौ उपजनापायधर्मक इत्यर्थोऽतोऽपायपरिहारायाप्रमादः कर्तव्य इत्यभिप्रायः।।११।।

बुद्ध्यादिचेष्टाविषयं चेद् ब्रह्मेदं तदिति विशेषतो गृह्येत बुद्ध्याद्युपरमे च ग्रहणकारणाभावाद् अनुपलभ्यमानं नास्त्येव ब्रह्म। यद्धि करणगोचरं तदस्तीति प्रसिद्धं लोके विपरीतं चासत् इत्यतश्चानर्थको योगः। अनुपलभ्यमानत्वाद्वा नास्तीत्युपलब्धव्यं ब्रह्मेत्येवं प्राप्त इदमुच्यते-सत्यम्,

एवं परमार्थदर्शिनः-

**यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।**
**अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ।।१४।।**

यदा यस्मिन्काले सर्वे कामाः कामयितव्यस्यान्यस्याभावात्प्रमुच्यन्ते विशीर्यन्ते येऽस्य प्राक्प्रतिबोधाद्विदुषो हृदि बुद्धौ श्रिता आश्रिताः। बुद्धिर्हि कामानामाश्रयो नात्मा। 'कामः संकल्पः' (बृ.उ.१/५/३) इत्यादिश्रुत्यन्तराच्च।

अथ तदा मर्त्यः प्राक्प्रबोधात् आसीत्स प्रबोधोत्तरकालमविद्याकामकर्मलक्षणस्य मृत्योर्विनाशादमृतो भवति। गमनप्रयोजकस्य मृत्योर्विनशाद्गमनानुपपत्तेरत्रेहैव प्रदिपनिर्वाणवत्सर्वबन्धनोपशमाद् ब्रह्म समश्नुते ब्रह्मैवभवतीत्यर्थः।।१४।।

कदा पुनः कामानां मूलतो विनाश इत्युच्यते-

**यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः।**
**अथ मर्योऽमृतो भवत्येतावद्धयनुशासनम् ।।१५।।**

यदा सर्वे प्रभिद्यन्ते भेदम् उपयान्ति विनश्यन्ति हृदयस्य बुद्धेरिह जीवत एव ग्रन्थयो ग्रन्थिवद् दृढबन्धनरूपा अविद्याप्रत्यया इत्यर्थः। अहमिदं शरीरं ममेदं धनं सुखी दःखी चाहम् इत्येवमादिलक्षणास्तद्विपरीतब्रह्मात्मप्रत्ययोपजननाद् ब्रह्मैवाहमस्मि असंसारीति विनष्टेष्वविद्याग्रन्थिषु तन्निमित्ताः कामा मूलतो विनश्यन्ति। अथ मर्त्योऽमृतो भवत्येतावद्धयेतावदेवैतावन्मात्रं नाधिकमस्तीत्याशङ्का कर्तव्या-अनुशासनमनुशिष्टिरुपदेशः सर्ववेदान्तानमिति बाक्यशेषः।।१५।।

निरस्ताशेषविशेषव्यापिब्रह्मात्मप्रतिपच्या प्रभिन्नसमस्ताविद्यादिग्रन्थेर्जीवत एव ब्रह्मभूतस्य विदुषो न गतिर्विद्यत इत्युक्तमत्र ब्रह्म समश्नुत इत्युक्तत्वात्। 'न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति' (बृ.उ.४/४/६) इति श्रुत्यन्तराच्च।

ये पुनर्मन्दब्रह्मविदो विद्यान्तरशीलिनश्च ब्रह्मलोकभाजो ये च तद्विपरीताः सेसारभाजः तेषामेव गतिविशेष उच्यते-प्रकृतोत्कृष्टब्रह्मविद्याफलस्तुतये।

किं चान्यदग्निविद्या पृष्टा प्रत्युक्ता च। तस्याश्च फलप्राप्तिप्रकारो वक्तव्य इति मन्त्रारम्भः। तत्र-

**शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका।**
**तपोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति।।१६।।**

शतं च शतसंख्याका एका च सुषुम्ना नाम पुरुषस्य हृदयाद्विनिःसृता नाड्यः शिरास्तासां मध्ये मूर्धानं भिच्वा विनिःसृता निर्गता सुषुम्ना नाम। तयान्तकाले हृदय आत्मानं वशीकृत्य योजयेत्।

तया नाड्योर्ध्वमुपर्यायन् गच्छन्नादित्यद्वारेणामृतत्वममरणधर्मत्वमापेक्षिकम्। 'आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते' (वि.पु.२/८/१७) इति स्मृतेः। ब्रह्मणा वा सह कालान्तरेण मुख्यममृतत्वमेति भुक्त्वा भोगाननुपमान्ब्रह्मलोकगतान्। विष्वङ्नानाविधगतयः अन्या नाड्य उत्क्रमणे निमित्तं भवन्ति संसारप्रतिपत्यर्था एव भवन्तीत्यर्थाः।।१६।।

इदानीं सर्ववल्ल्यर्थोपसंहारार्थमाह–

**अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः।**
**तं स्वाच्छरीरात्प्रवृहेन्मुञ्जा- दिवेषीकां धैर्येण।**
**तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति।।१७।।**

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां सम्बन्धिनि हृदये संनिविष्टो यथाव्याख्यातः तं स्वादात्मीयाच्छरीरात्प्रवृहेत् उद्यच्छेन्निष्कर्षेत्पृथक्कुर्यादित्यर्थः। किमिवेत्युच्यते मुञ्जादिव इपीकामन्तःस्थां धैर्येणाप्रमादेन। तं शरीरान्निष्कृष्टं चिन्मात्रं विद्याद्विजानीयाच्छुक्रममृतं यथोक्तं ब्रह्मेति द्विर्वचनमुपनिषत्परिसमाप्त्यर्थमितिशब्दश्च।।१७।।

विद्यास्तुत्यर्थोऽयमाख्यायिकार्थोपसंहारोऽधुनोच्यते–

**मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम्।**
**ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव।।१८।।**

मृत्युप्रोक्तां यथोक्तामेतां ब्रह्मविद्यां योगविधिं च कृत्स्नं समस्तं सोपकरणं सफलमित्येतत्; नचिकेता वरप्रदानात् मृत्योर्लब्ध्वा प्राप्येत्यर्थः; किम्? ब्रह्मप्राप्तोऽभून्मुक्तोऽभवदित्यर्थः। कथम्? विद्याप्राप्त्या विरजो विगतधर्माधर्मो विमृत्युर्विगतकामाविद्यश्च सन्पूर्वमित्यर्थः।

न केवलं नचिकेता एव अन्योऽपि नचिकेतोवदात्मविद् अध्यात्ममेव निरुपचरितं प्रत्यक् स्वरूपं प्राप्य तत्त्वमेवेत्यभिप्रायः नान्यद्रूपमप्रत्यग्रूपम्। तदेवमध्यात्ममेवमुक्तप्रकारेण वेद विजानातीत्येवंवित्सोऽपि विरजः सन्ब्रह्मप्राप्त्या विमृत्युर्भवतीति वाक्यशेषः।।१८।।

शिष्याचार्ययोः प्रमादकृतान्यायेन विद्याग्रहणप्रतिपादननिमित्तदोषप्रशमनार्थेयं शान्तिः उच्यते–

**ॐ सह नाववतु।**
**सह नौ भुनक्तु।**
**सह वीर्यं करवावहै।**
**तेजस्वि नावधीतमस्तु।**
**मा विद्विषावहै।।१९।।**
**ॐ शान्तिः! शान्तिः!! शान्तिः!!!**

सह नावावामवतु पालयतु विद्यास्वरूपप्रकाशनेन। कः? स एव परमेश्वर उपनिषत्प्रकाशितः। किं च सह नौ भुनक्तु तत्फलप्रकाशनेन नौ पालयतु। सहैवावां विद्याकृतं वीर्यं सामर्थ्यं करवावहै निष्पादयावहै। किं च तेजस्विनौ तेजस्विनोरावयोर्यदधीतं तत्स्वधीतमस्तु। अथवा तेजस्वि नावावाभ्यां यदधीतं तदतीव तेजस्वि वीर्यवदस्तु इत्यर्थः। मा विद्विषावहै शिष्याचार्यावन्योन्यं प्रमादकृतान्यायाध्ययनाध्यापनदोषनिमित्तं द्वेषं मा करवावहै इत्यर्थः। शान्तिः शान्तिः शान्तिरिति त्रिर्वचनं सर्वदोषोपशमनार्थमित्योमिति।।१९।।

*इति कठोपनिषदि द्वितीयोऽध्यायः समाप्तः।।२।।*